# केनोपनिषत्

**ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुःश्रोत्रमथो बलमिन्द्रियाणि च**

**सर्वाणि।सर्वं ब्रह्मौपनिषदम्।**

**माहं ब्रह्म निराकुर्याम्।**

**मा मा ब्रह्म निराकरोत्। अनिराकरणमस्त्वनिराकरणं मे अस्तु।**

**तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु। ते मयि सन्तु।।**

**ॐ शान्तिः शान्तिः शान्तिः।।**

# अध्याय १

**उपक्रमणिका**

केनेषितम् इत्याद्योपनिषत् पर-ब्रह्म-विषया वक्तव्या इति नवमस्याध्यायस्य आरम्भः। प्रागेतस्मात् कर्माण्यशेषतः परिसमापितानि, समस्त-कर्माश्रय-भूतस्य च प्राणस्य उपासनान्युक्तानि, कर्माङ्ग-साम-विषयाणि च। अनन्तरं च गायत्र-साम-विषयं दर्शनं वंशान्तम् उक्तं कार्यम्। सर्वमेतद्यथोक्तं कर्म च ज्ञानं च सम्यगनुष्ठितं निष्कामस्य मुमुक्षोः सत्त्व-शुद्ध्यर्थं भवति। सकामस्य तु ज्ञान-रहितस्य केवलानि श्रौतानि स्मार्त्तानि च कर्माणि दक्षिण-मार्ग-प्रतिपत्तये पुनरावृत्तये च भवन्ति। स्वाभाविक्या त्वशास्त्रीयया प्रवृत्त्या पश्वादि-स्थावरान्ता अधो-गतिः स्यात्। "अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्त्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानम्" (छा. ५.१०.८) इति श्रुतेः।"प्रजा ह तिस्रोऽत्यायमीयुः" (ऐ.आ. २.१.१.४) इति च मन्त्र-वर्णात्।

**ज्ञानाधिकारि-निरूपणम्**

विशुद्ध-सत्त्वस्य तु निष्कामस्य एव बाह्यादनित्यात् साध्य-साधन-सम्बन्धाद् इह कृतात् पूर्वकृताद्वा संस्कार-विशेषोद्भवाद् विरक्तस्य प्रत्यगात्म-विषया जिज्ञासा प्रवर्त्तते। तदेतद्वस्तु प्रश्न-प्रतिवचन-लक्षणया श्रुत्या प्रदर्श्यते केनेषितम् इत्याद्यया। काठके चोक्तम् "पराञ्चि खानि व्यतृणत्स्वयम्भूः तस्मात्पराङ् पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षद् आवृत्त-चक्षुरमृतत्वमिच्छन्" (क. २.१.१) इत्यादि। "परीक्ष्य लोकान् कर्म-चितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" (मु. १.२.१२) इत्याद्याथर्वणे च।

**निवृत्ताज्ञानस्य कृत-कृत्यता-प्रदर्शनम्**

एवं हि विरक्तस्य प्रत्यगात्म-विषयं विज्ञानं श्रोतुं मन्तुं विज्ञातुं च सामर्थ्यमुपपद्यते, नान्यथा।

एतस्माच्च प्रत्यगात्म-ब्रह्म-विज्ञानात् संसार-बीजमज्ञानं काम-कर्म-प्रवृत्ति-कारणमशेषतो निवर्त्तते,

"तत्र को मोहः कः शोकः एकत्वमनुपश्यतः" (ई. ७) इति मन्त्र-वर्णात्। "तरति शोकमात्मवित्"

(छा. ७.१.३) इति, "भिद्यते हृदय-ग्रन्थिः छिद्यन्ते सर्व-संशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्

दृष्टे परावरे" (मु. २.२.८) इत्यादि-श्रुतिभ्यश्च।

**समुच्चयवादखण्डनम्**

आक्षेपः

कर्म-सहितादपि ज्ञानादेतत् सिध्यतीति चेत्।

समाधानम्

न, वाजसनेयके तस्यान्य-कारणत्व-वचनात्। "जाया मे स्यात्" (बृ. १.४.१७) इति प्रस्तुत्य "पुत्रेणायं लोको जय्यो, नान्येन कर्मणा, कर्मणा पितृ-लोको विद्यया देव-लोकः" (बृ. १.५.१६) इत्यात्मनोऽन्यस्य लोक-त्रयस्य कारणत्वमुक्तं वाजसनेयके। तत्रैव च पारिव्राज्य-विधाने हेतुरुक्तः "किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः" (बृ. ४.४.२२) इति। तत्रायं हेत्वर्थः - प्रजा-कर्म-तत्संयुक्त-विद्याभिर्मनुष्य-पितृ-देव-लोक-त्रय-साधनैरनात्म-लोक-प्रतिपत्ति-कारणैः किं करिष्यामः। न चास्माकं लोक-त्रयमनित्यं साधन-साध्यमिष्टम्, येषामस्माकं स्वाभाविकः अजोऽजरोऽमृतोऽभयो न वर्धते कर्मणा, नो कनीयान्, नित्यश्च लोक इष्टः। स च नित्यत्वान्नाविद्या-निवृत्ति-व्यतिरेकेण अन्य-साधन-निष्पाद्यः। तस्मात् प्रत्यगात्म-ब्रह्म-विज्ञान-पूर्वकः सर्वैषणा-संन्यासः एव कर्त्तव्य इति।

**ज्ञानकर्मविरोधप्रदर्शनम्**

कर्म-सहभावित्व-विरोधाच्च प्रत्यगात्म-ब्रह्म-विज्ञानस्य। न ह्युपात्त-कारक-फल-भेद-विज्ञानेन कर्मणा प्रत्यस्तमित-सर्व-भेद-दर्शनस्य प्रत्यगात्म-ब्रह्म-विषयस्य सहभावित्वम् उपपद्यते। वस्तु-प्राधान्ये सति अपुरुष-तन्त्रत्वाद् ब्रह्म-विज्ञानस्य।

**प्रश्नप्रतिवचनरूपकथनतात्पर्यम्**

तस्माद् दृष्टादृष्टेभ्यो बाह्य-साधन-साध्येभ्यो विरक्तस्य प्रत्यगात्म-विषया ब्रह्म-जिज्ञासेयं "केनेषितम्" इत्यादि-श्रुत्या प्रदर्श्यते। शिष्याचार्य-प्रश्न-प्रतिवचन-रूपेण कथनं तु सूक्ष्म-वस्तु-विषयत्वात्, सुख-प्रतिपत्ति-कारणं भवति। केवल-तर्कागम्यत्वं च दर्शितं भवति। "नैषा तर्केण मतिरापनेया" (क १.२.९) इति श्रुतेश्च। "आचार्यवान् पुरुषो वेद" (छा. ६.१४.२), आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत्" (छा. ४.९.३) इति। "तद्विद्धि प्रणिपातेन (गी. ४.३४) इत्यादि-श्रुति-स्मृति-

नियमाच्च कश्चिद् गुरुं ब्रह्म-निष्ठं विधिवदुपेत्य प्रत्यगात्म-विषयादन्यत्र शरणमपश्यन् अभयं नित्यं

शिवमचलम् इच्छन् पप्रच्छ इति कल्प्यते।।

**आनन्दगिरिटीका**

केनेषितमित्यादिकां तलवकारशाखोपनिषदं व्याचिख्यासुः भगवान्भाष्यकारः अहंप्रत्ययगोचरस्य आत्मनः संसारित्वाद् असंसारिब्रह्मभावस्य उपनिषत्प्रतिपाद्यस्य असम्भवाद् निर्विषयत्वादव्याख्येयत्वम् इत्याशङ्क्य अहङ्कारसाक्षिणः संसारित्वग्राहकप्रमाणाविषयत्वाद् ब्रह्मत्वप्रतिपादने विरोधासम्भवात् सविषयत्वाद् व्याख्येयत्वं प्रतिजानीते - **केनेषितमित्याद्या** इति। कस्तर्हि नवमस्याध्यायस्य अष्टाध्याय्या सह नियतपूर्वोत्तरभावानुपपत्तिलभ्यः सम्बन्धः इत्याशङ्क्य हेतुहेतुमद्भावलक्षणसम्बन्धं दर्शयितुं वृत्तमनुवदति - **प्रागेतस्मात्** इत्यादिना। कर्माङ्गसाम पाञ्चभक्तिकं साप्तभक्तिं च तद्विषयाण्युपासनानि पृथिव्यादिदृष्ट्या उक्तानि। प्राणदृष्ट्या गायत्रसामोपासनं च। शिष्याचार्यसन्तानाविच्छेदः वंशस्तदवसानेन ग्रन्थेन कार्यरूपमेव वस्तूक्तं चेत् तर्हि प्राणाद्युपासनसहितस्य कर्मणः संसारफलत्वाद् ब्रह्मज्ञानानुपयोगात् कथं हेतुहेतुमद्भावः सम्बन्धः अभिधित्सितः इत्याशङ्क्य नित्यकर्मणां तावद् ज्ञानोपयोगित्वं कथयति - **सर्वमेतत्** इति। काम्यानां प्रतिषिद्धानां च फलं तद्दोषदर्शनेन वैराग्यार्थं कथयति - **सकामस्य** तु इति। एतयोः पथोः ज्ञानकर्मणोः मध्ये केनापि मार्गेण ये न प्रवृत्तास्ते प्रतिषिद्धानुष्ठायिनः इत्यर्थः। **जायस्व म्रियस्व** इति। पुनः पुनः जायन्ते म्रियन्ते च इत्यर्थः। **तिस्रः प्रजाः** जरायुजाण्डजोद्भिज्जलक्षणाः। पितृयाणदेवयानलक्षणमार्गद्वयगमनम् अतीत्य कष्टामेव गतिमीयुः प्राप्ताः इत्यर्थः। एवं कर्मफलमुक्त्वा ततो विरक्तस्य विशुद्धसत्वस्य ब्रह्मज्ञानेऽधिकारः इति दर्शयन् हेतुहेतुमद्भावमाह - **विशुद्धसत्वस्य** इति। साध्यसाधनसम्बन्धाद्विरक्तस्य इति सम्बन्धः। तत्र निमित्तस्य अदृष्टस्य अनियतत्वमाह - **इह कृतात्** इति। कर्मफलाद्विरक्तस्य ब्रह्मजिज्ञासा भवतीत्यत्र अन्यसंवादमाह - **काठके च** इति। **आवृत्तचक्षुः** इति। साध्यसाधनभावादुपरतकरणग्रामः, चक्षुर्ग्रहणस्य उपलक्षणार्थत्वात्। अन्वयव्यतिरेकसिद्धत्वं च आह - **एवं हि** इति। **नान्यथा** इति। अविरक्तस्य बहिर्विषयाक्षिप्तचेतसः आत्मजिज्ञासैव अनुपपन्ना। कथञ्चिद् जाताऽपि न फलावसाना स्यात् शूद्रयागाद् इव इत्यर्थः। यद्यपि एवमुपनिषदः कर्मकाण्डसम्बन्धोऽस्ति तथापि उपनिषज्जन्यज्ञानस्य निष्प्रयोजनत्वाद् नोपनिषदः व्याख्यारम्भः सम्भवति इत्याशङ्क्य आह - **एतस्मात् च** इति। समुच्चयवादिनोऽभिप्रायं शङ्कते - **कर्मसहितादपि** इति। एकाध्ययनविधिगृहीतत्वात् कर्मज्ञानकाण्डयोः एकं फलं वाच्यं ततः कर्मसमुच्चिताद् ज्ञानात् सनिदान-संसारनिवृत्तिलक्षणं फलं सिध्यति, न कर्मसु विरक्तस्य उपनिषदारम्भः इत्यर्थः। अध्ययनविधि-परिग्रहमात्रेण कर्मकाण्डस्य न मोक्षफलत्वं कल्पयितुं शक्यं फलान्तरावगमविरोधाद् इत्याह - **न वाजसनेयके** इति। किञ्च यदि श्रुतेः कर्मसमुच्चितज्ञानं विधित्सितं स्यात् तदा पारिव्राज्यं नोपदिश्येत श्रुत्या हेत्वभिधानेन, ततो न समुच्चयः श्रुत्यर्थः इत्याह - **तत्रैव च** इति। प्रजाशब्दस्य उपलक्षणार्थत्वमादाय हेत्वर्थमाह - **तत्रायम्** इति। किं करिष्यामो न किमपि आत्मकामत्वादेव इति शेषः। तत्फलं भुक्त्वा क्रमेण मोक्षसम्भवात् किमिति प्रजादिषु अनादर इत्याशङ्क्य आह - **न च** इति। इष्टोऽप्ययमात्मलोकः कर्मणा विना न लभ्यते फलत्वात्, मोक्षस्य अन्यथास्वभावमुक्तत्वे बन्धमोक्षावस्थयोः अविशेषापातात् (उभयोरपि स्वभावसिद्धत्वेन) इत्याशङ्क्य आह - **स च** इति। कर्ममोक्षे (कर्मणा साध्ये मोक्षे अभ्युपेयमाने) कार्यस्य उत्पाद्यादेः असम्भवात् सम्यग्ज्ञानाद् अविद्यानिवृत्त्या फलप्रसिद्ध्युपपत्तेः न कर्मकार्यो मोक्षः इत्यर्थः। ब्रह्मज्ञानस्य अनुभवावसानतासिद्धये परोक्षनिश्चयपूर्वकः संन्यासः कर्तव्यः। सिद्धे चानुभवावसाने ब्रह्मात्मज्ञाने स्वभावप्राप्तः संन्यासः इति द्रष्टव्यम्। इतश्च न कर्मब्रह्मात्मतानिश्चयसमुच्चयः शास्त्रार्थः इत्याह -

**कर्मसहभावित्वेति**। ननु कर्मवद् ब्रह्मज्ञानस्य विधितोऽनुष्ठेयत्वाद् विधेश्च विनियोज्यादि-भेदापेक्षितत्वात् (विनियोज्यः - यमुद्दिश्य विधिः विहितः) कथं सर्वभेद-दर्शन-प्रत्यस्तमयः उच्यते ब्रह्मज्ञाने सति इत्याशङ्क्य आह - **वस्तुप्राधान्ये सति** इति। विधिजन्यप्रयत्नभाव्यो हि विधिविषय उच्यते ज्ञानं न तथा इति तद्विधेरसिद्धिः इत्यर्थः। यस्मात् प्रत्यगात्मनो ब्रह्मतानिश्चयस्य परोक्षस्य अपरोक्षस्य वा कर्मणा न समुच्चयो न प्रामाणिकः तस्मादित्युपसंहरति - **तस्मात्** इति। प्रश्नप्रतिवचनरूपेण प्रतिपादनस्य तात्पर्यमाह - **शिष्याचार्येति**। आपनेया प्रापणीया हन्तव्या वा न भवति इत्यर्थः। साधिष्ठं शोभनतमं फलं प्रापयति इत्यर्थः।

## वाक्यभाष्यम्

### उपक्रमणिका

समाप्तं कर्मात्म-भूत-प्राण-विषयं विज्ञानं कर्म चानेकप्रकारम्, ययोर्विकल्प-समुच्चयानुष्ठानाद् दक्षिणोत्तराभ्यां सृतिभ्यामावृत्त्यनावृत्ती भवतः। अत ऊर्ध्वं फल-निरपेक्ष-ज्ञान-कर्म-समुच्चयानुष्ठानात् कृतात्म-संस्कारस्य उच्छिन्नात्म-ज्ञान-प्रतिबन्धकस्य द्वैत-विषय-दोष-दर्शिनो निर्ज्ञाताशेष-बाह्य-विषयत्वात् संसार-बीजमज्ञानम् उच्चिच्छित्सतः प्रत्यगात्म-विषय-जिज्ञासोः केनेषितम् इत्यात्म-स्वरूप-तत्त्व-विज्ञानाय अयमध्यायः आरभ्यते। तेन च मृत्यु-पदमज्ञानम् उच्छेत्तव्यं, तत्तन्त्रो हि संसारो यतः। अनधिगतत्वाद् आत्मनो युक्ता तदधिगमाय तद्विषया जिज्ञासा।

### ज्ञानकर्मविरोधः

कर्म-विषये चानुक्तिः, तद्विरोधित्वात्। अस्य विजिज्ञासितव्यस्य आत्म-तत्त्वस्य कर्म-विषयेऽवचनम्। कस्मादिति चेद् आत्मनो हि यथावद्विज्ञानं कर्मणा विरुध्यते। निरतिशय-ब्रह्म-स्वरूपो ह्यात्मा विजिज्ञापयिषितः तदेव ब्रह्म त्वं विद्धि, नेदं यदिदमुपासते(के. १.४) इत्यादि-श्रुतेः। न हि स्वाराज्येऽभिषिक्तो ब्रह्मत्वं गमितः कञ्चन नमितुमिच्छति। अतो ब्रह्मास्मीति सम्बुद्धो न कर्म कारयितुं शक्यते। न ह्यात्मानम् अवाप्तार्थं ब्रह्म मन्यमानः प्रवृत्तिं प्रयोजनवतीं पश्यति। न च निष्प्रयोजना प्रवृत्तिः। अतो विरुध्यत एव कर्मणा ज्ञानम्। अतः कर्म-विषये अनुक्तिः, विज्ञान-विशेष-विषया एव जिज्ञासा।

### अज्ञस्य निष्कामस्य कर्मारम्भः, प्राप्तज्ञानस्य न

### आक्षेपः कर्मानारम्भ इति चत्।समाधानम्

न। निष्कामस्य संस्कारार्थत्वात्।

### आक्षेपस्य विवरणम्

यदि ह्यात्म-विज्ञानेन आत्माविद्या-विषयत्वात् परितित्याजयिषितं कर्म, ततः प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् (म.भा.वन. २.४९) इत्यनारम्भ एव कर्मणः श्रेयान्। अल्प-फलत्वाद् आयास-बहुलत्वात् तत्त्व-ज्ञानादेव च श्रेयः-प्राप्तेः इति चेत्।

### समाधानस्य विवरणम्

सत्यम्, एतदविद्या-विषयं कर्म अल्प-फलत्वादि-दोषवद् बन्ध-रूपं च सकामस्य, कामान् यः कामयते (मु. ३.२.२), इति नु कामयमानः (संसरति) (बृ. ४.४.६) इत्यादि-श्रुतिभ्यः। न निष्कामस्य। तस्य तु संस्कारार्थान्येव कर्माणि भवन्ति तन्निर्वर्तकाश्रय-प्राण-विज्ञान-सहितानि। देवयाजी श्रेयान् आत्मयाजी वा इत्युपक्रम्य आत्मयाजी तु करोति इदं मेऽनेनाङ्गं संस्क्रियते इति संस्कारार्थमेव कर्माणीति वाजसनेयके। महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः (मनु. २.२८), यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् (गी. १८.५) इत्यादि-स्मृतेश्च। प्राणादि-विज्ञानं च केवलं,

कर्म समुच्चितं वा, सकामस्य प्राणात्म-प्राप्त्यर्थमेव भवति। निष्कामस्य त्वात्म-ज्ञान-प्रतिबन्ध-निर्मार्ष्ट्यै भवति, आदर्श-निर्मार्जनवत्। उत्पन्नात्म-विद्यस्य त्वनारम्भो निरर्थकत्वात्। कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। तस्मात् कर्म न कुर्वन्ति यतयः पार-दर्शिनः(म.भा.शां. २४२.७) इति। क्रियापथश्चैव पुरस्तात् संन्यासश्च तयोः संन्यास एवात्यरेचयत् इति, त्यागेनैके (कै. १.३), नान्यः पन्था विद्यते (श्वे. ३.८) इत्यादि-श्रुतिभ्यश्च। न्यायाच्च, उपाय-भूतानि हि कर्माणि संस्कार-द्वारेण ज्ञानस्य। ज्ञानेन त्वमृतत्व-प्राप्तिः। विद्यया विन्दतेऽमृतम् (के. २.४) इत्यादि-श्रुति-स्मृतिभ्यश्च। न हि नद्याः पारगो नावं न मुञ्चति यथेष्ट-देश-गमनं प्रति स्वातन्त्र्ये सति।

**आत्मनः कर्माविषयत्वम्**

न हि स्वभाव-सिद्धं वस्तु सिषाधयिषति साधनैः। स्वभाव-सिद्धश्चात्मा। तथा न आपिपयिषितः। आत्मत्वे सति नित्याप्तत्वात्। नापि विचिकारयिषितः। आत्मत्वे सति नित्यत्वाद् अविकारित्वादविषयत्वादमूर्त्तत्वाच्च। श्रुतेश्च न वर्धते कर्मणा (बृ. ४.४.२३) इत्यादि। स्मृतेश्च अविकार्योऽयमुच्यते (गी. २.२५) इति। न च सञ्चिकीर्षितः शुद्धमपाप-विद्धम्(ई. ८) इत्यादि-श्रुतिभ्यश्च। अनन्यत्वाच्च। अन्येनान्यत्संस्क्रियते। न चात्मनोऽन्य-भूता क्रिया अस्ति, न च स्वेनैवात्मना स्वमात्मानं सञ्चिकीर्षेत्। न च वस्त्वन्तराधानं नित्यम्। प्राप्तिर्वा वस्त्वन्तरस्य नित्या। नित्यत्वं चेष्टं मोक्षस्य। अत उत्पन्न-विद्यस्य कर्मारम्भोऽनुपपन्नः। अतो व्यावृत्त-बाह्य-बुद्धेः आत्म-विज्ञानाय केनेषितम् इत्याद्यारम्भः।।

## १.१

**केनेषितं पतति प्रेषितं मनः। केन प्राणः प्रथमः प्रैति युक्तः।**

**केनेषितां वाचमिमां वदन्ति। चक्षुः श्रोत्रं क उ देवो युनक्ति।। १.१ ।।**

**पदभाष्यम्**
केन इषितं केन कर्त्रा इषितम् इष्टम् अभिप्रेतं सद् मनः पतति गच्छति स्वविषयं प्रतीति सम्बध्यते।

इषेः आभीक्ष्ण्यार्थस्य, गत्यर्थस्य च, इहासम्भवाद् इच्छार्थस्यैव एतद्रूपमिति गम्यते। इषितमिति इट्-प्रयोगस्तु च्छान्दसः। तस्यैव प्र-पूर्वस्य नियोगार्थे प्रेषितम् इत्येतत्।

**इषित-प्रेषित-शब्द-द्वयार्थविचारः**
तत्र प्रेषितमित्येवोक्ते प्रेषयितृ-प्रेषण-विशेष-विषयाकाङ्क्षा स्यात् - केन प्रेषयितृ-विशेषेण कीदृशं वा प्रेषणमिति। इषितमिति तु विशेषणे सति तदुभयं निवर्त्तते। कस्येच्छा-मात्रेण प्रेषितमित्यर्थ-विशेष-निर्धारणात्।

**आक्षेपः**

यद्येषोऽर्थोऽभिप्रेतः स्यात् केनेषितम् इत्येतावतैव सिद्धत्वात् प्रेषितम् इति न वक्तव्यम्। अपि च शब्दाधिक्यादर्थाधिक्यं युक्तमिति इच्छया, कर्मणा, वाचा वा, केन प्रेषितमित्यर्थ-विशेषोऽवगन्तुं युक्तः।

**समाधानम्**

न, प्रश्न-सामर्थ्यात्। देहादि-सङ्घातादनित्यात् कर्म-कार्याद् विरक्तः, अतोऽन्यत् कूटस्थं नित्यं वस्तु बुभुत्समानः पृच्छतीति सामर्थ्यादुपपद्यते। इतरथा इच्छा-वाक्कर्मभिर्देहादि-सङ्घातस्य प्रेरयितृत्वं प्रसिद्धमिति प्रश्नोऽनर्थकः एव स्यात्।

**आक्षेपः**

एवमपि प्रेषित-शब्दस्यार्थो न प्रदर्शित एव।

**समाधानम्**

न, संशयवतोऽयं प्रश्नः इति प्रेषित-शब्दस्यार्थ-विशेष उपपद्यते। किं यथा-प्रसिद्धमेव कार्य-करण-सङ्घातस्य प्रेषयितृत्वं, किं वा सङ्घात-व्यतिरिक्तस्य स्वतन्त्रस्य इच्छा-मात्रेणैव मन-आदि-प्रेषयितृत्वम्

इत्यस्यार्थस्य प्रदर्शनार्थं केनेषितं पतति प्रेषितं मनः इति विशेषण-द्वयमुपपद्यते।

**मनःप्रभृतीनां पारतन्त्र्यप्रदर्शनम्**

**आक्षेपः**

ननु स्वतन्त्रं मनः स्व-विषये स्वयं पततीति प्रसिद्धम्। तत्र कथं प्रश्न उपपद्यते इति।

**समाधानम्**

उच्यते - यदि स्वतन्त्रं मनः प्रवृत्ति-निवृत्ति-विषये स्यात्, तर्हि सर्वस्य अनिष्ट-चिन्तनं न स्यात्। अनर्थं च जानन् सङ्कल्पयति। अभ्यग्रदुःखे (पाठभेदः - अत्युग्रदुःखे) च कार्ये वार्यमाणमपि प्रवर्त्तत एव मनः। तस्माद्युक्त एव केनेषितम् इत्यादि-प्रश्नः।

केन प्राणः युक्तः नियुक्तः प्रेरितः सन् प्रैति गच्छति स्व-व्यापारं प्रति। प्रथमः इति प्राण-विशेषणं स्यात्, तत्पूर्वकत्वात् सर्वेन्द्रिय-प्रवृत्तीनाम्। केन इषितां वाचम् इमां शब्द-लक्षणां वदन्ति लौकिकाः। तथा चक्षुः श्रोत्रं च स्वे स्वे विषये क उ देवः द्योतनवान् युनक्ति

नियुङ्क्ते, प्रेरयति।। १.१ ।।

**आनन्दगिरिटीका**

इष आभीक्ष्ण्ये इष गतौ चेति धात्वन्तरसम्भवे कथमिच्छार्थस्यैव व्याख्यानम् इत्याशङ्क्याह - **इषेः** इति। आभीक्ष्ण्यं पौनःपुन्यं तद्विषयतायाः गतिविषयतायाः वा मनसः अनभिप्रेतत्वाद् मनःप्रवर्त्तकविशेषस्यैव बुभत्सितत्वादित्यर्थः। इट्प्रयोगे सति गुणेन भवितव्यम्। तदा एषितमिति स्यात्। तदभावात् छान्दसत्वाभिधानम्। न तु धातोः अनिट्त्वाद् अनुबन्धस्य विकल्प-विधानाद् (इषुगमियमां छः इति सूत्रे उकारानुषङ्गाननुषङ्गाभ्यां पाठद्वैविध्यप्रचयाद् इषधातोः उदित्वस्य वैकल्पिकत्वाङ्गीकरणादित्यर्थः) अन्वेषितमन्विष्टमिति वैकल्पिक-प्रयोगादिदर्शनादिति (उदितो वा इति क्त्वायां वेट्कतया यस्य विभाषा इति निष्ठायाम् इण्निषेधादिः छान्दसत्वोक्तिः अयोक्ष्यत। उदिदभावपक्षे तीषसहेत्यादेः तादिसामान्यविषयतया यस्य विभाषा इत्यस्य च निष्ठातिरिक्तः एव विकल्पयति प्रसराभ्यबपगमेन इषेः निष्ठायाम् इड्-विकलप-सम्भवाद् गुणाभावे नैव छान्दसत्वोक्तिः नेया इति भावः।)। इषितं प्रेषितमिति पदद्वयस्यार्थवत्वमाह - **तत्र प्रेषितम्** इत्यादिना। **इच्छामात्रेण** इति। प्रयत्नमन्तरेण सन्निधिमात्रेण इति व्याख्यातं, नेदं व्याख्यानमपि शोभते। अपर्याय-शब्द-भेदस्य अर्थभेदाव्यभिचारादित्याह - **अपि च** इति। त्वदुक्तोऽयमर्थविशेषः न घटते, सङ्घातस्यैव इच्छादिभिः प्रवर्त्तकत्वसिद्धेः प्रश्नानुपपत्तिप्रसङ्गादित्याह - **न प्रश्नेति**। मनसः स्वातन्त्र्यात् स्वव्यतिरिक्त-प्रवर्त्तक-सम्भावनाभावात् प्रश्नो न घटते इत्याक्षिप्य समाधत्ते - **ननु स्वतन्त्रम्** इत्यादिना। **अत्युग्रदुःखे च** इति। अद्यतनीन-दुःखे (सद्योदुःखप्रदः इति यावत्) द्यूतादिकार्ये। (१)

**वाक्यभाष्यम्**

प्रवृत्ति-लिङ्गाद् विशेषार्थः प्रश्न उपपन्नः। रथादीनां हि चेतनावदधिष्ठितानां प्रवृत्तिर्दृष्टा। न अनधिष्ठितानाम्। मन-आदीनां च अचेतनानां प्रवृत्तिर्दृश्यते। तद्धि लिङ्गं चेतनावतः अधिष्ठातुरस्तित्वे। करणानि हि मन-आदीनि नियमेन प्रवर्त्तन्ते। तन्नासति चेतनावति अधिष्ठातरि उपपद्यते। तद्विशेषस्य च अनधिगमात् चेतनावत्सामान्ये चाधिगते विशेषार्थः प्रश्न उपपद्यते।

केनेषितं केनेष्टं कस्येच्छा-मात्रेण मनः पतति गच्छति, स्व-विषये नियमेन व्याप्रियत इत्यर्थः। मनुतेऽनेनेति विज्ञान-निमित्तमन्तःकरणं मनः। प्रेषितम् इव इत्युपमार्थः। न तु इषित-प्रेषित-शब्दयोरर्थाविह सम्भवतः। न हि शिष्यान् इव मन-आदीनि विषयेभ्यः प्रेषयत्यात्मा। विविक्त-नित्य-चित्-स्वरूपतया तु निमित्त-मात्रं प्रवृत्तौ, नित्य-चिकित्साधिष्ठातृवत्। प्राणः इति नासिका-भवः, प्रकरणात्। प्रथमत्वं प्रचलन-क्रियायाः प्राण-निमित्तत्वात्। स्वतो विषयावभास-मात्रं करणानां प्रवृत्तिः। चलि-क्रिया तु प्राणस्यैव मन-आदिषु। तस्मात् प्राथम्यं प्रणास्य। प्रैति गच्छति। युक्तः प्रयुक्त इत्येतत्। वाचः वदनं किं-निमित्तम्। प्राणिनां चक्षुःश्रोत्रयोश्च को देवः प्रयोक्ता। करणानामधिष्ठाता चेतनवान् यः स किं-विशेषणः इत्यर्थः।। (१.१)

**आनन्दगिरिटीका**

एवमुपनिषदारम्भं सम्भाव्य वाक्यस्यार्थं संगृह्णाति - **प्रवृत्तिलिङ्गात्** इति। शिष्याचार्ययोः प्रश्नप्रतिवचनरूपा श्रुतिः सुखप्रतिपत्त्यर्था प्रवृत्ता। तत्र प्रश्नः किं ज्ञातेऽज्ञाते वा इति चोद्यनिरासाय सामान्यतो ज्ञातेऽपि (चेतनावतः अधिष्ठातृत्वम्) विशेषतश्चाज्ञाते सम्भवति विकल्पकरणवदिति सूत्रितमेतद्विवृणोति - **रथादीनां च** इति। मनआदीनामेव चेतनत्वाद् अचेतप्रवृत्तिवादित्यसिद्धो हेतुः इति नाशङ्कनीयमित्याह - **करणानि हि** इति। अन्यत्र मना अभूवं नादर्शम् इत्यादिलोकानुभवाद् मनआदीनां करणत्वं सिद्धं, ततः प्रदीपवद् अचेतनत्वं सिद्धमित्यर्थः। **इच्छामात्रेण** इति प्रयत्नाद्यभावो लक्ष्यते न तु इच्छास्तित्वं निर्विकारतायाः विवक्षितत्वात्।

प्रषितमिव इतीवशब्दाध्याहारेण किमिति व्याख्यातम् यथा राज्ञः इच्छामात्रेण काचिद् भृत्य-प्रवृत्तिः काचिच्च वागादि-व्यापारेण तद्वद् इह किं न स्यादित्याशङ्क्याह - **न तु** इति। सक्रियस्य सर्वस्य अनित्यतया अवधारितत्वाद् निष्क्रियं वस्तु पिपृच्छिषितं ततो नार्थभेदः (इच्छाप्रेरणादिरूपः अर्थविशेषः) सम्भवति इत्यर्थः। **विषयेभ्यः** इति। विषयग्रहणार्थः। नित्यचिकित्सायां अधिष्ठातुः चकोरस्य सन्निधिमात्रेण यथा राजभोजनादि-प्रवृत्ति-निमित्तत्वं तद्वद् इत्यर्थः। **प्रकरणादिति**। करणसन्निधानादित्यर्थः।

## १.२

एवं पृष्टवते योग्यायाह गुरुः। श्रृणु यत् त्वं पृच्छसि, मन-आदि-करण-जातस्य को देवः स्व-विषयं

प्रति प्रेरयिता, कथं वा प्रेरयति इति -

**श्रोत्रस्य श्रोत्रं मनसो मनो यत्। वाचो ह वाचं स उ प्राणस्य प्राणः।**

**चक्षुषश्चक्षुरतिमुच्य घीराः। प्रेत्यास्माल्लोकादमृता भवन्ति।। १.२ ।।**

**पदभाष्यम्**

श्रोत्रस्य श्रोत्रं श्रृणोत्यनेनेति श्रोत्रम्। शब्दस्य श्रवणं प्रति करणम्। शब्दाभिव्यञ्जकं श्रोत्रम् इन्द्रियम्।

तस्य श्रोत्रं सः यस्त्वया पृष्टः चक्षुः श्रोत्रं क उ देवो युनक्ति इति।

**प्रतिवचनस्य अनुरूपत्वप्रदर्शनम्**
**आक्षेपः**
असावेवं-विशिष्टः श्रोत्रादीनि नियुङ्क्ते इति वक्तव्ये, नन्वेतदननुरूपं प्रतिवचनं श्रोत्रस्य श्रोत्रम् इति।

**समाधानम्**

नैष दोषः। तस्यान्यथा विशेषानवगमात्। यदि हि श्रोत्रादि-व्यापार-व्यतिरिक्तेन स्व-व्यापारेण विशिष्टः श्रोत्रादि-नियोक्ता अवगम्येत दात्रादि-प्रयोक्तृवत्, तदा इदमननुरूपं प्रतिवचनं स्यात्। न त्विह श्रोत्रादीनां प्रयोक्ता स्वव्यापार-विशिष्टो लवित्रादिवद् अधिगम्यते। श्रोत्रादीनामेव तु संहतानां व्यापारेण, आलोचन-सङ्कल्पाध्यवसाय-लक्षणेन, फलावसान-लिङ्गेन अवगम्यते – अस्ति हि श्रोत्रादिभिरसंहतः यत्प्रयोजन-प्रयुक्तः श्रोत्रादि-कलापो गृहादिवद् इति। संहतानां परार्थत्वादवगम्यते श्रोत्रादीनां प्रयोक्ता। तस्माद् अनुरूपमेवेदं प्रतिवचनं श्रोत्रस्य श्रोत्रम् इत्यादि।

**श्रोत्रस्य श्रोत्रमिति श्रोत्रादीनां प्रकाशकत्वम्**

**आक्षेपः**

कः पुनरत्र पदार्थः श्रोत्रस्य श्रोत्रम् इत्यादेः। न हि अत्र श्रोत्रस्य श्रोत्रान्तरेणार्थः, यथा प्रकाशस्य प्रकाशान्तरेण।

**समाधानम्**

नैष दोषः। अयमत्र पदार्थः - श्रोत्रं तावत् स्व-विषय-व्यञ्जन-समर्थं दृष्टम्। तत्तु स्व-विषय-व्यञ्जन-

सामर्थ्यं श्रोत्रस्य चैतन्ये ह्यात्म-ज्योतिषि नित्येऽसंहते सर्वान्तरे सति भवति, न असति इति। अतः श्रोत्रस्य श्रोत्रमित्याद्युपपद्यते। तथा च श्रुत्यन्तराणि - "आत्मनैवायं ज्योतिषाऽऽस्ते" (बृ. ४.३.६), "तस्य भासा सर्वमिदं विभाति" (क. २.२.१५, मु. २.२.१०, श्वे. ६.१४), "येन सूर्यस्तपति तेजसेद्धः" (तै.ब्रा. ३.१२.९.७) इत्यादीनि। "यदादित्य-गतं तेजो जगद्भासयतेऽखिलम्" (गी. १५.१२), "क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत" (गी. १३.३३) इति च गीतासु। काठके च "नित्यो नित्यानां चेतनश्चेतनानाम्" (क. २.२.१३) इति। श्रोत्राद्येव सर्वस्यात्म-भूतं चेतनमिति प्रसिद्धम्। तदिह निवर्त्यते। अस्ति किमपि विद्वद्-बुद्धि-गम्यं सर्वान्तरतमं कूटस्थम् अजमजरममृतमभयं श्रोत्रादेरपि श्रोत्रादि तत्सामर्थ्य-निमित्तम् इति प्रतिवचनं शब्दार्थश्च उपपद्यते

एव।

तथा मनसः अन्तःकरणस्य मनः। न हि अन्तःकरणमन्तरेण चैतन्य-ज्योतिषः दीधितिं (पा.भेदः - चैतन्य-ज्योतिषा दीपितं) स्व-विषय-सङ्कल्पाध्यवसायादि-समर्थं स्यात्। तस्माद् मनसोऽपि मन इति। इह बुद्धि-मनसी एकीकृत्य निर्देशो मनस इति। यद् वाचो ह वाचम्। यच्छब्दो यस्मादर्थे श्रोत्रादिभिः सर्वैः सम्बध्यते। यस्माच्छ्रोत्रस्य श्रोत्रं, यस्मान्मनसो मन इत्येवम्।

**वाचो ह वागिति विभक्तिनिर्णयः**

वाचो ह वाचम् इति द्वितीया प्रथमात्वेन विपरिणम्यते, "प्राणस्य प्राणः" इति दर्शनात्।

**आक्षेपः**

"वाचो ह वाचम्" इत्येतदनुरोधेन "प्राणस्य प्राणम्" इति कस्माद् द्वितीयैव न क्रियते।

**समाधानम्**

न, बहूनाम् अनुरोधस्य युक्तत्वात्। वाचम् इत्यस्य वाग् इत्येतावद्वक्तव्यं, सः उ प्राणस्य प्राणः इति

शब्द-द्वयानुरोधेन। एवं हि बहूनामनुरोधो युक्तः कृतः स्यात्। पृष्टं च वस्तु प्रथमयैव निर्देष्टुं युक्तम्।

स यस्त्वया पृष्टः प्राणस्य प्राणाख्य-वृत्ति-विशेषस्य प्राणः तत्कृतं हि प्राणस्य प्राणन-सामर्थ्यम्। न हि आत्मना अनधिष्ठितस्य प्राणनमुपपद्यते। "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" (तै.आ. २.७.१), "ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति" (क. २.२.३), इत्यादि-श्रुतिभ्यः। इहापि च वक्ष्यते "येन प्राणः प्रणीयते तदेव ब्रह्म त्वं विद्धि" (के. १.८) इति।

**आक्षेपः**

श्रोत्रादीन्द्रिय-प्रस्तावे घ्राणस्यैव ग्रहणं युक्तं, न तु प्राणस्य।

**समाधानम्**

सत्यमेवम्, प्राण-ग्रहणेनैव तु घ्राणस्य ग्रहणं कृतमेव मन्यते श्रुतिः। सर्वस्यैव करण-कलापस्य यदर्थ-प्रयुक्ता प्रवृत्तिः तद् ब्रह्मेति प्रकरणार्थो विवक्षितः।

तथा चक्षुषश्चक्षुः। रूप-प्रकाशकस्य चक्षुषो यद्रूप-ग्रहण-सामर्थ्यं तदात्म-चैतन्याधिष्ठितस्यैव। अतः चक्षुषश्चक्षुः।

**ज्ञात्वा-पद-अध्याहार-निरूपणम्**

प्रष्टुः पृष्टस्यार्थस्य ज्ञातुमिष्टत्वात् श्रोत्रादेः श्रोत्रादि-लक्षणं यथोक्तं ब्रह्म "ज्ञात्वा" इत्यध्याह्रियते। "अमृताः भवन्ति" इति फल-श्रुतेश्च। ज्ञानाद्ध्यमृतत्वं प्राप्यते। ज्ञात्वाऽतिमुच्य इति सामर्थ्यात् श्रोत्रादि-करण-कलापम् उज्झित्वा। श्रोत्रादौ ह्यात्म-भावं कृत्वा तदुपाधिः सन् तदात्मना जायते, म्रियते, संसरति च। अतः श्रोत्रादेः श्रोत्रादि-लक्षणं ब्रह्म आत्मा इति विदित्वा अतिमुच्य श्रोत्राद्यात्म-भावं परित्यज्य।

ये श्रोत्राद्यात्म-भावं परित्यजन्ति ते धीराः धीमन्तः। न हि विशिष्ट-धीमत्वमन्तरेण श्रोत्राद्यात्म-भावः शक्यः परित्यक्तुम्। प्रेत्य व्यावृत्य अस्माद् लोकात् पुत्र-मित्र-कलत्र-बन्धुषु ममाहंभाव-संव्यवहार-

लक्षणात्। त्यक्त-सर्वैषणा भूत्वा इत्यर्थः। अमृताः अमरण-धर्माणो भवन्ति। "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" (कै. १.२), "पराञ्चि खानि व्यतृणत्स्वयम्भूः तस्मात्पराङ् पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्त-चक्षुरमृतत्त्वमिच्छन्" (क. २.१.१), "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः....अत्र ब्रह्म समश्नुते" (क. २.३.१४) इत्यादि-श्रुतिभ्यः।

अथवा अतिमुच्य इत्यनेनैव एषणा-त्यागस्य सिद्धत्वात् अस्माल्लोकात् प्रेत्य अस्माच्छरीरादपेत्य, मृत्वेत्यर्थः।। १.२ ।।

**आनन्दगिरिटीका**

प्रतिवचनस्य प्रश्नाननुरूपत्वमाशङ्क्य समाधत्ते - **असावेवंविशिष्ट** इत्यादिना। श्रोत्रादयः स्वविलक्षणशेषाः संहतत्वाद् गृहादिवद् इत्यनुमानेन श्रोत्रादिशेषी तावदवगम्यते। यदि सोऽपि संहतः स्यात् तर्हि गृहादिवद् अचेतनः स्यात्। ततः तस्याप्यन्यः शेषी कल्प्यस्तस्याप्यन्य इत्यनवस्थाप्रसङ्गपरिहाराय असंहतः चेतनः गम्यते। अतः सर्वसाक्षिणं लक्षयितुं युक्तमेवं प्रतिवचनमित्यर्थः। फलावसानं फलनिष्पत्तिलिङ्गं यस्मिन्, अवगत्या हि करणस्य व्यापारो लिङ्ग्यते नित्यावगतिव्यञ्जकत्वाद्वा फलावसानलिङ्गं (फलस्य वृत्तेः अवसानं पर्यवसानभूमिः चित् तल्लिङ्गमित्यर्थः।) व्यापारस्तेन तच्छेषी लक्ष्यते इत्यर्थः। प्रतिवचनस्य संक्षेपतः तात्पर्यमाह - **श्रोत्राद्येव सर्वस्य** इति। यस्मादस्ति श्रोत्रस्य श्रोत्रं तस्माच्छ्रोत्रादौ आत्मबुद्धिः संत्यक्तव्या इति शेषः (अयं शेषः भाष्ये निमित्तमित्यस्यानन्तरं द्रष्टव्यः।)। प्राणचेष्टा चेतनाधिष्ठानपूर्विका अचेतनप्रवृत्तित्वाद् रथादिप्रवृत्तिवद् इत्यभिप्रेत्याह - **न हि आत्मनाऽनधिष्ठितस्य** इति। ज्ञात्वेति पदाध्याहारे कारणमाह - **सामर्थ्यात्** इति। श्रोत्राद्यात्मभाव-

त्यागमन्तरेण अमृतत्वासम्भवाद् ज्ञानबलात् श्रोत्राद्यात्मभावं त्यक्त्वा अमृताः भवन्ति इति सम्बन्धः। एतत्स्फुटयति - **श्रोत्रादौ हि** इत्यादिना। **मृत्वेति**। विदेहमुक्तिः विवक्षिता। प्रारब्धभोगक्षये शरीरान्तरोत्पादे कारणाभावाद् अवश्यंभाविनी विदुषो मुक्तिः इत्यर्थः।

**वाक्यभाष्यम्**

**प्रतिवचनतात्पर्यम्**

श्रोत्रस्य श्रोत्रम् इत्यादि प्रतिवचनं निर्विशेषस्य निमित्तत्वार्थम्। विक्रियादि-विशेष-रहितस्यात्मनो मन-आदि-प्रवृत्तौ निमित्तत्वम् इत्येतत् श्रोत्रस्य श्रोत्रम्इत्यादि-प्रतिवचनार्थः, अनुगमात्। तदनुगतानि ह्यत्रास्मिन्नर्थेऽक्षराणि।

**निर्विशेषचैतन्यस्यैव करणप्रवृत्तिनिमित्तत्वम्**

कथम्श्रृणोत्यनेनेति श्रोत्रम्। तस्य शब्दावभासकत्वं श्रोत्रत्वम्। शब्दोपलब्धृ-रूपतया अवभासकत्वं न स्वतः श्रोत्रस्य, अचिद्रूपत्वात्। आत्मनश्च चिद्रूपत्वात्, यच्छ्रोत्रस्य उपलब्धृत्वेन अवभासकत्वं तदात्म-निमित्तत्वात् श्रोत्रस्य श्रोत्रम् इत्युच्यते। यथा क्षत्रस्य क्षत्रम्। यथा वा उदकस्यौष्ण्यमग्नि-निमित्तमिति दग्धुरप्युदकस्य दग्धा अग्निरुच्यते। उदकमपि ह्यग्नि-संयोगादग्निरुच्यते तद्वत्। अनित्यं यत्संयोगादुपलब्धृत्वं तत्करणं श्रोत्रादि। उदकस्य इव दग्धृत्वमनित्यं हि तत्र तत्। यत्र तु नित्यमुपलब्धृत्वम्, अग्नौ इव औष्ण्यं, स नित्योपलब्धि-स्वरूपत्वाद् दग्धा इव उपलब्धोच्यते। श्रोत्रादिषु श्रोतृत्वाद्युपलब्धिः अनित्या, नित्या चात्मनि। अतः श्रोत्रस्य श्रोत्रम् इत्याद्यक्षरणाम् अर्थानुगमात् उपपद्यते निर्विशेषस्य उपलब्धि-स्वरूपस्यात्मनो मन-आदि-प्रवृत्ति-निमित्तत्वमिति। मन-आदिष्वेवं यथोक्तम्।

वाचो ह वाचं प्राणस्य प्राणः इति विभक्ति-द्वयं सर्वत्रैव द्रष्टव्यम्। कथम्पृष्टत्वात् स्वरूप-निर्देशः, प्रथमयैव च निर्देशः। तस्य च ज्ञेयत्वात् कर्मत्वमिति द्वितीया। अतो वाचो ह वाचं प्राणस्य प्राणः इत्यस्मात् सर्वत्रैव विभक्ति-द्वयम्।

यदेतच्छ्रोत्राद्युपलब्धि-निमित्तं श्रोत्रस्य श्रोत्रम् इत्यादि-लक्षणं नित्योपलब्धि-स्वरूपं निर्विशेषमात्म-तत्त्वं तद् बुद्ध्वा अतिमुच्य अनवबोध-निमित्ताध्यारोपिताद् बुद्ध्यादि-लक्षणात् संसाराद् मोक्षणं कृत्वा धीराः धीमन्तः प्रेत्य अस्माल्लोकात् शरीरात् प्रेत्य वियुज्य अन्यस्मिन् अप्रतिसन्धीयमाने निर्निमित्तत्वाद् अमृताः भवन्ति। सति ह्यज्ञाने कर्माणि शरीरान्तरं प्रतिसन्दधते। आत्मावबोधे तु सर्व-कर्मारम्भ-निमित्ताज्ञान-विपरीत-विद्याग्नि-विप्लुष्टत्वात् कर्मणामिति अनारम्भेऽमृता एव भवन्ति। शरीरादि-सन्तानाविच्छेद-प्रतिसन्धानाद्यपेक्षया अध्यारोपित-मृत्यु-वियोगात् पूर्वमप्यमृताः सन्तो नित्यात्म-स्वरूपत्त्वात्, अमृता भवन्ति इत्युपचर्यते।। २ ।।

**आनन्दगिरिटीका**

प्रतिवचनवाक्यार्थसंग्रहं विवृणोति - **विक्रियादि** इत्यादिना। मनआदीनां यः प्रवर्तकः स किंविशेष इतिप्रश्नस्य निर्विशेषतैव विशेष इत्युत्तरम्। क्रियायाः गुणस्य संबन्धस्य वा विशेषस्य व्यावर्त्तकधर्मस्य (आत्मनि) दर्शयितुमशक्यत्वात् क्रियादिमत्वे घटादिवद् अनात्मत्वप्रसङ्गाद् अतो निर्विशेषचैतन्यात्मकः अहमित्येवं ज्ञानं सम्यग्ज्ञानम्। न च अभावेन सद्वयत्वप्रसङ्गः। तस्य पृथक्सत्त्वाभावात् स्वरूपेण व्यवहाराङ्गत्वाद् इत्युक्तम् अन्यत्र (अक्षरब्राह्मणवार्त्तिके अभावनिष्ठोऽन्यत्रापि निषेधः किमुत अक्षर इति।)। यदि शौक्ल्यादिवत् कोऽपि विशेषः अभविष्यत् तदा तमवक्ष्यत्। श्रुतिस्तु उपलक्षणवृत्त्यैव प्रतिवचनं ब्रुवाणा निर्विशेषत्वं मन्यते इति श्रुत्यक्षरानुसारादवगम्यते इत्याह - **अनुगमात्** इति। निर्विशेषवाचकपदाभावात् कथं निर्विशेषे अक्षराणामनुगमः इत्याह - **कथम्** इति। निर्विशेषस्य वाचकशक्त्या वाक्यार्थत्वाभावेऽपि उपलक्षणवृत्त्या (कयाचिल्लक्षणया)

भविष्यति इत्यभिप्रेत्य श्रोत्रशब्दस्य तावद् मुख्यार्थमाह - **श्रृणोति** इति। शब्दावभासकत्वं स्वशक्त्या एव भविष्यति। कथं तस्य शब्दावभासकत्वेन आत्मा उपलक्षयितव्यः इत्याकांक्षायामाह - **शब्दोपलब्धृरूपतया** इति। शक्तिः सतः प्रकाशमानस्यैव वाच्या, नासतोऽप्रकाशमानस्य, नरविषाणायमानत्वेन शक्तिमत्वानुपपत्तेः। सत्ता प्रकाशश्च आत्मरूपम्, तद्भेदे मानाभावात्। अतः उपलब्धृतादात्म्येन एव श्रोत्रस्य अवभासकत्वं न स्वातन्त्र्येण, जडत्वात्। जडस्य च सत्ताहीनत्वात् शुक्तिरूप्यस्य इव इत्यर्थः। श्रोत्रस्य अवभासकत्वम् उपलब्धृतादात्म्येनेति यदि उपलब्धा उपलक्ष्यते तर्हि उपलब्धुरपि अवभासकत्वमन्याधीनमिति अनवस्था प्राप्नोति इत्याशङ्क्याह - **आत्मनश्च** इति। स्वप्रकाशत्वादुपलब्धुः सत्ताप्रतीत्योः अनन्यायत्तत्वाद् नानवस्था इत्यर्थः। भवत्वेवमनवस्थाऽभावः। तथापि कथं श्रोत्रस्य श्रोत्रमित्यात्मा उच्यते इत्याशङ्क्याह - **यच्छ्रोत्रस्य** इति। **तदात्मनिमित्तत्वात्** इति। तस्य आत्मनिमित्तत्वात् श्रोत्रस्य श्रोत्रमिति उपलक्ष्यते निर्विशेषं चैतन्यमात्रमित्यर्थः। **यथा क्षत्रस्य** इति। क्षत्रजातिनियामकं कर्म क्षत्रमित्युच्यते यथा इत्यर्थः। यदि श्रोत्रादिसाक्ष्यात्मास्ति कथं तर्हि लोकायतिकादेः श्रोत्रादिष्वेव उपलब्धृत्वव्यवहारः इत्याशङ्क्याह - **उदकम्** इति। तद्वद् उपलब्धृसम्बन्धात् (उपलब्धुः आत्मनः सर्वव्यापित्वेन सम्बन्धात्) श्रोत्रादिषु उपलब्धृत्वव्यवहारः इत्यर्थः। भवन्मते तर्हि नित्योपलब्धिस्वभावः आत्मेति श्रोत्रादेः करणत्वं न स्यात्। क्रियायां हि करणापेक्षा इत्याकांक्षायामाह - **अनित्यं यत्** इति। प्रमातुः यत्सम्बन्धाद् अनित्यमुपलब्धृत्वं भवति बुद्धिपरिणामैः तच्छ्रोत्रादिकरणं बुद्धिवृत्त्यपेक्षया भवति इत्यर्थः। श्रोत्रादिसङ्गते प्रमातरि (अन्तःकरणावच्छिन्नचितः) अनित्योपलब्धृत्व-सम्भवेऽपि तवासङ्गस्य साक्षिणः कथमुपलब्धृत्व-व्यपदेशः इत्याशङ्क्याह - **यत्र तु** इति। उक्तमर्थं संक्षिप्याह - **श्रोत्रादिषु** इति। श्रोत्रादिषु निमित्तेषु सत्सु श्रोत्रादिसंहते प्रमातरि श्रोतृत्वादिरूपोपलब्धिः (श्रोत्रादिजन्यबुद्धिपरिणामरूपोपलब्धिः) इति उपलब्धृत्वमित्यर्थः। मनसो मन इत्यादिषु एवमतिदिशति - **मन आदिष्वेवम्** इति। न्यायसामान्याद् यथोक्तं व्याख्यानं द्रष्टव्यम्। न हि मनसो मनस्त्वं वाचो वाक्त्वं वा स्वातन्त्र्येण सम्भवति। अध्यस्तत्वादतोऽधिष्ठानसत्ताप्रकाशाभ्यामेव सत्ताप्रकाशत्वं मनआदेः। तच्चाधिष्ठानं निर्विशेषमेव उपलक्षयितव्यम् सविशेषवत्वे अध्यस्तत्वप्रसङ्गादिति भावः। विभक्तिद्वयनिर्देशतात्पर्यमाह - **वाचो ह** इत्यादिना। मन आदेः प्रवर्त्तकः किंस्वभावः इति पृष्टत्वात् स्वरूपनिर्देशः कर्तव्यः। स च प्रथमया। निर्देशे प्रथमा प्रोक्ता इति स्मरणादित्यर्थः। अतिमुच्य धीराः इत्युत्तरं वाक्यं साध्याहारं योजयति - **यदेतत्** इत्यादिना। एतद्बुद्ध्वा अमृताः भवन्ति इति (अध्याहृतस्य पदस्य अमृताः भवन्ति इत्यनेन) सम्बन्धः। तादात्म्येन अध्यारोपितो यो बुद्ध्यादिः अनवबोधनिमित्तः संसारः ततः मोक्षणं तादात्म्याध्यास-निवृत्तिः दृष्टं फलम्। अमृताः भवन्ति इति विदेहमुक्तिः अदृष्टं फलमित्यर्थः। कर्मणां सम्बन्धानुपपत्तिः इति शेषः। निमित्ताभावात्शरीरान्तराद्यनारम्भे अमृताः भवन्ति इति प्रयोगाद् आगन्तुकत्वम् अमृतत्वस्य इति शङ्कानिवृत्त्यर्थमाह - **शरीरात्** इति। अनादिभवपरम्परया शरीर्यासं परस्ताच्च भविष्यामि इति शरीरादि-सन्तानाविच्छेदस्य प्रतिसन्धानं धर्माद्यधिकारित्वाध्यासः कामादिदोषकल्पनं च एतस्माद् अध्यारोपितो यो मत्युः तद्वियोगापेक्षया अमृतत्वस्य भवनम् औपचारिकम् इत्यर्थः। (२)

## १.३

यस्मात् श्रोत्रादेरपि श्रोत्राद्यात्म-भूतं ब्रह्म अतः -

**न तत्र चक्षुर्गच्छति। न वाग्गच्छति। नो मनो न विद्मो**

**न विजानीमो यथैतदनुशिष्यात्।**

**अन्यदेव तद्विदितादथो अविदितादधि**

**इति शुश्रुम पूर्वेषां येनस्तद्व्याचचक्षिरे।। १.३ ।।**

**पदभाष्यम्**

न तत्र तस्मिन् ब्रह्मणि चक्षुर्गच्छति। स्वात्मनि गमनासम्भवात्। तथा न वाग्गच्छति। वाचा हि शब्द उच्चार्यमाणोऽभिधेयं प्रकाशयति यदा, तदाऽभिधेयं प्रति वाग्गच्छति इत्युच्यते। तस्य च शब्दस्य तन्निर्वर्त्तकस्य च करणस्य आत्मा ब्रह्म। अतो न वाग्गच्छति। यथा अग्निर्दाहकः प्रकाशकश्चापि सन्

न ह्यात्मानं प्रकाशयति दहति वा, तद्वत्। नो मनः मनश्चान्यस्य सङ्कल्पयितृ, अध्यवसायितृ च सद्, नात्मानं सङ्कल्पयति, अध्यवस्यति च, तस्यापि ब्रह्म आत्मेति। इन्द्रिय-मनोभ्यां हि वस्तुनो विज्ञानम्। तदगोचरत्वाद् न विद्मः तद्ब्रह्म ईदृशमिति। अतो न विजानीमः यथा येन प्रकारेण एतद् ब्रह्म अनुशिष्याद् उपदिशेत् शिष्यायेत्यभिप्रायः। यद्धि करण-गोचरं तदन्यस्मै उपदेष्टुं शक्यं जाति-गुण-क्रिया-विशेषणैः। न तज्जात्यादि विशेषणवद् ब्रह्म। तस्माद् विषमं शिष्यानुपदेशेन प्रत्याययितुमिति, उपदेशे तदर्थ-ग्रहणे च यत्नातिशय-कर्त्तव्यतां दर्शयति - न विद्मो न विजानीमो यथैतदनुशिष्याद् इति।

**आगमवाक्यस्य अवतरणिका**

अत्यन्तमेव उपदेश-प्रकार-प्रत्याख्याने प्राप्ते तदपवादोऽयमुच्यते। सत्यमेवं प्रत्यक्षादिभिः प्रमाणैः न परः प्रत्याययितुं शक्यः, आगमेन तु शक्यत एव प्रत्याययितुमिति। तदुपदेशार्थमागममाह - अन्यदेव

तद्विदितादथो अविदितादधि इति।

**व्याकृताव्याकृताभ्यामन्यद् ब्रह्म**

अन्यदेव पृथगेव तद् यत्प्रकृतं श्रोत्रादीनां श्रोत्रादीत्युक्तमविषयश्च तेषां, तद् विदिताद् अन्यदेव हि। विदितं नाम यद्विदि-क्रियया अतिशयेनाप्तं तद्विदि-क्रिया-कर्म-भूतम्। क्वचित् किञ्चित् कस्यचित् विदितं स्यादिति सर्वमेव व्याकृतं विदितमेव। तस्मादन्यदेव इत्यर्थः। अविदितमज्ञातं तर्हि इति प्राप्ते आह - अथो अपि अविदिताद् विदित-विपरीतादव्याकृताविद्या-लक्षणाद् व्याकृत-बीजात्, अधि इति उपर्यर्थे, लक्षणया अन्यदित्यर्थः। यद्धि यस्मादधि उपरि भवति, तत् तस्माद् अन्यदिति प्रसिद्धम्।

**हेयोपादेयव्यतिरिक्तत्वप्रतिपादनद्वारा ब्रह्मणः आत्माभिन्नत्व-प्रतिपादनम्**

यद्विदितं तदल्पं, मर्त्यं, दुःखात्मकं च (छा. ७.२४.१) इति हेयम्। तस्माद् विदितादन्यद् ब्रह्म इत्युक्ते त्वहेयत्वमुक्तम्। तथा अविदितादधि इत्युक्तेऽनुपादेयत्वमुक्तं स्यात्। कार्यार्थं हि कारणमन्यदन्येन उपादीयते। अतश्च न वेदितुः अन्यस्मै प्रयोजनाय अन्यदुपादेयं भवतीति। एवं

विदिताविदिताभ्यामन्यदिति हेयोपादेय-प्रतिषेधेन स्वात्मनोऽनन्यत्वाद् ब्रह्म-विषया जिज्ञासा शिष्यस्य निर्वर्त्तिता स्यात्। न हि अन्यस्य स्वात्मनो विदिताविदिताभ्यामन्यत्वं वस्तुनः सम्भवति इत्यात्मा ब्रह्म इत्येष वाक्यार्थः। "अयमात्मा ब्रह्म" (मा. २), "य आत्मा अपहतपाप्मा" (छा. ८.७.१), "यत्साक्षादपरोक्षाद् ब्रह्म" (बृ. ३.४.१), "य आत्मा सर्वान्तरः" (बृ. ३.४.१) इत्यादि-श्रुत्यन्तरेभ्यश्चेति।

**प्रत्यगात्मब्रह्मैक्योपदेशःसम्प्रदायागतः**

एवं सर्वात्मनः सर्व-विशेष-रहितस्य चिन्मात्र-ज्योतिषो ब्रह्मत्व-प्रतिपादकस्य वाक्यार्थस्य आचार्योपदेश-परम्परया प्राप्तत्वमाह - इति शुश्रुमेत्यादि। ब्रह्म च एवम् आचार्योपदेश-परम्परया एवाधिगन्तव्यं न तर्कतः, प्रवचन-मेधा-बहुश्रुत-तपो-यज्ञादिभ्यश्च, इति एवं शुश्रुम श्रुतवन्तो वयं पूर्वेषाम् आचार्याणां वचनम्। ये आचार्याः नः अस्मभ्यं ब्रह्म व्याचचक्षिरे व्याख्यातवन्तो विस्पष्टं

कथितवन्तः, तेषामित्यर्थः।। १.३ ।।

**आनन्दगिरिटीका**

सर्पाद्यध्यासाधिष्ठान-रज्जुवत् श्रोत्राद्यध्यासाधिष्ठान-चैतन्यं श्रोत्रस्य श्रोत्रमित्यादिना लक्षितं तर्हि रज्जुवद् (यथा रज्जुः विषयरूपा तथा) अधिष्ठानत्वाद्विषयत्व-प्रसङ्ग इति शङ्कां निवर्तयति - **यस्मात् श्रोत्रादेरपि** इत्यादिना। अध्यस्तस्य हि अधिष्ठानमेव स्वरूपम्, आद्यन्तमध्येषु तदव्यभिचारात्। स्वरूप-विषयता च न पदार्थधर्मः। ततोऽप्रयोजकोऽयं हेतुः इत्यर्थः। अविषयत्वात् तर्हि शास्त्राचार्योपदेश्यत्वमपि न स्यादित्याशङ्क्य नास्त्येव वास्तवमित्याह - **इन्द्रियमनोभ्यां हि** इति। ब्राह्मणोऽयं इत्यादि जातितः, कृष्णोऽयमित्यादि गुणतः, पाचकोऽयमित्यादि क्रियातः, राजपुरुषः इत्यादि सम्बन्धविशेषणतः उपदिश्यते। ब्रह्म तु न जात्यादिमत्। "केवलो निर्गुणश्च" इत्यादिश्रुतेः। अज्ञेन आगमस्य भेदेन प्रतिपन्नत्वात् तद्-दृष्ट्या आचार्यस्यापि अविद्यालेशोत्थ-दृष्ट्या व्यावहारिकः उपदेशः उपपद्यते आगमतः तस्यैव (आगमस्यैव) आत्मानं ब्रह्मरूपेण लक्षयितुं योग्यतातिशयवत्त्वाद् (जडप्राणादिचेष्टा चेतनाधिष्ठानपूर्विका इत्याद्यनुमानं लक्षयदपि आत्मानं न ब्रह्मत्वेन लक्षयितुमलम्, आगमस्तु तथा इति तस्य योग्यतातिशयवत्त्वमिति भावः) इत्यभिप्रेत्याह - **अत्यन्तमेव** इति। वाक्यस्य पदार्थान्व्याख्याय तात्पर्यं दर्शयितुमुपक्रमते - **यद्विदितं तदल्पम्** इत्यादिना। यद्वेदितुः अन्यत् तद्विदितमविदितं च इति द्वयी गतिः। ततो विदितत्वाविदितत्वनिषेधेन वेदितुः स्वरूपं ब्रह्म इत्यत्र तात्पर्यमागमस्य इत्याह - **न हि अन्यस्य** इति। (३)

**वाक्यभाष्यम्**

न तत्र चक्षुर्गच्छति इति उक्तेऽपि पर्यनुयोगे हेतुरप्रतिपत्तेः। श्रोत्रस्य श्रोत्रम् इत्येवमादिना उक्तेऽप्यात्म-तत्त्वेऽप्रतिपन्नत्वात् सूक्ष्मत्व-हेतोः वस्तुनः पुनः पुनः पर्यनुयुयुक्षा-कारणम् (दुर्विज्ञेयत्वम्) आह - न तत्र चक्षुर्गच्छति इति। तत्र श्रोत्राद्यात्म-भूते चक्षुरादीनि – वाक्चक्षुषोः सर्वेन्द्रियोपलक्षणार्थत्वाद् – न विज्ञानमुत्पादयन्ति। सुखादिवत् तर्हि गृह्येत अन्तः-करणेनात आह - नो मनः। न सुखादिवद् मनसो विषयस्तत्। इन्द्रियाविषयत्वात्।

न विद्मो न विजानीमः अन्तःकरणेन यथा एतद् ब्रह्म मन-आदि-करण-जातम् अनुशिष्याद् अनुशासनं कुर्यात्, प्रवृत्ति-निमित्तं भवेत् तथा, अविषयत्वान्न विद्मो न विजानीमः। अथवा श्रोत्रादीनां श्रोत्रादि-लक्षणं ब्रह्म विशेषेण दर्शय इत्युक्तः आचार्य आह - न शक्यते दर्शयितुम्। कस्मात्न तत्र चक्षुर्गच्छति इत्यादि पूर्ववत्सर्वम्। अत्र तु विशेषो यथैतदनुशिष्यादिति। यथैतद् अनुशिष्यात् प्रतिपादयेत् अन्योऽपि शिष्यान् इतोऽन्येन विधिनेत्यभिप्रायः।

सर्वथापि ब्रह्म बोधय इत्युक्त आचार्य आह - अन्यदेव तद्विदितादथो अविदितादधि इत्यागमं, विदिताविदिताभ्यामन्यत्वम्। यो हि ज्ञाता स एव सः, सर्वात्मकत्वात्। अतः सर्वात्मनो ज्ञातुर्ज्ञात्रन्तराभावाद् विदितादन्यत्वम्। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता (श्वे. ३.१९) इति च मन्त्र-वर्णात्। विज्ञातारमरे केन विजानीयात् (बृ. २.४.१४) इति च वाजसनेयके। अपि च व्यक्तमेव विदितं, तस्मादन्यद् इत्यभिप्रायः। यद्विदितं व्यक्तं तदन्य-विषयत्वादल्पं सविरोधं, ततोऽनित्यम्, अत एवानेकत्वादशुद्धम्, अत एव तद्विलक्षणं ब्रह्म इति सिद्धम्।

**आक्षेपः**

अस्तु तर्ह्यविदितम्।

**संक्षिप्त-समाधानम्**

न, विज्ञानानपेक्षत्वात्।

**समाधानस्य विवरणम्**

यद्ध्यविदितं तद्विज्ञानापेक्षम्। अविदित-विज्ञानाय हि लोक-प्रवृत्तिः। इदं तु विज्ञानानपेक्षम्। कस्मात् विज्ञान-स्वरूपत्वात्। न हि यस्य यत्स्वरूपं तत्तेनान्यतोऽपेक्ष्यते। न च स्वत एवापेक्षा अनपेक्षमेव सिद्धत्वात्। प्रदीपः स्वरूपाभिव्यक्तौ न प्रकाशान्तरमन्यतोऽपेक्ष्यते स्वतो वा। यद्ध्यनपेक्षं तत्स्वत एव सिद्धम्। प्रकाशात्मकत्वात् प्रदीपस्य अपेक्षितोऽप्यनर्थकः स्यात्, प्रकाशे विशेषाभावात्। न हि प्रदीपस्य स्वरूपाभिव्यक्तौ प्रदीप-प्रकाशोऽर्थवान्। न च एवमात्मनोऽन्यत्र विज्ञानम् अस्ति, येन स्वरूप-विज्ञानेऽप्यपेक्ष्यते।

संक्षिप्ताक्षेपः (विवरणमधस्तात्) विरोध इति चेत्।

संक्षिप्त-समाधानम् (विवरणमधस्तात्)न, अन्यत्वात्।

आक्षेपस्य विवरणम् स्वरूप-विज्ञाने विज्ञान-स्वरूपत्वाद् विज्ञानान्तरं नापेक्षत इत्येतदसत्। दृश्यते हि विपरीत-ज्ञानम् आत्मनि सम्यग्ज्ञानं च। न जानाम्यात्मानमिति। श्रुतेश्च तत्त्वमसि (छा. ६.८.७), आत्मानमेवावेत् (बृ. १.४.१०), एतं वै तमात्मानं विदित्वा (बृ. ३.५.१) इति च सर्वत्र श्रुतिषु आत्म-विज्ञाने विज्ञानान्तरापेक्षत्वं दृश्यते। तस्मात् प्रत्यक्ष-श्रुति-विरोधः इति चेत्।

समाधानस्य विवरणम् न, कस्मात्अन्यो हि स आत्मा बुद्ध्यादि-कार्य-करण-सङ्घाताभिमान-सन्तानाविचेछेद-लक्षणोऽविवेकात्मको बुद्ध्यवभास-प्रधानः चक्षुरादि-करणो नित्य-चित्स्वरूपात्मान्तःसारो यत्रानित्यं विज्ञानमवभासते। बौद्ध-प्रत्ययानाम् आविर्भाव-तिरोभाव-धर्मकत्वात् तद्धर्मतयैव विलक्षणमपि चावभासते। अन्तः-करणस्य मनसोऽपि मनोऽन्तर्गतत्वात् सर्वान्तर-श्रुतेः। अन्तर्गतेन नित्य-विज्ञान-स्वरूपेण आकाशवद् अप्रचलितात्मना अन्तर्गर्भ-भूतेन बाह्यो बुद्ध्यात्मा तद्विलक्षणः, अर्चिभिः इव अग्निः प्रत्ययैराविर्भाव-तिरोभाव-धर्मकैर्विज्ञानाभास-रूपैः अनित्यैः अनित्य-विज्ञानः, आत्मा, सुखी, दुःखी, इत्यभ्युपगतो लौकिकैः। अतोऽन्यो नित्य-विज्ञान-स्वरूपादात्मनः। तत्र हि विज्ञानापेक्षा विपरीत-ज्ञानत्वं चोपपद्यते, न पुनः नित्य-विज्ञाने।

**बोधोपदेशस्य अध्यासनिरासार्थत्वम्**

आक्षेपः तत्त्वमसि इति बोधोपदेशो न उपपद्यते इति चेत्। आत्मानमेवावेत् (बृ. १.४.१०) इत्येवमादीनि च नित्य-बोधात्मकत्वात्। न हि आदित्योऽन्येन प्रकाश्यते। अतः तदर्थ-बोधोपदेशः अनर्थक इति चेत्।

समाधानम् न, लोकाध्यारोपापोहार्थत्वात्। सर्वात्मनि हि नित्य-विज्ञाने बुद्ध्याद्यनित्य-धर्माः लोकैरध्यारोपिता आत्माविवेकतः। तदपोहार्थो बोधोपदेशो बोधात्मनः। तत्र च बोधाबोधौ समञ्जसो। अन्य-निमित्तत्वाद् उदक इव औष्ण्यम् अग्नि-निमित्तं, रात्र्यहनी इव आदित्य-निमित्ते। लोके नित्यावौष्ण्य-प्रकाशावग्न्यादित्ययोः अन्यत्र भावाभावयोः निमित्तत्वाद् अनित्यौ इव उपचर्येते। धक्षत्यग्निः, प्रकाशयिष्यति सविता, इति तद्वत्। एवं च सुख-दुःख-बन्ध-मोक्षाद्यध्यारोपो लोकस्य, तदपेक्ष्य तत्त्वमसि, (छा. ६.८.७) आत्मानमेवावेत्, (बृ. १.४.१०) इत्यात्मावबोधोपदेशेन श्रुतयः केवलम् अध्यारोपापोहार्थाः। यथा सविताऽसौ प्रकाशयति आत्मानम् इति तद्वद् बोधाबोध-कर्त्तृत्वं च नित्य-बोधात्मनि। तस्माद् अन्यदविदितात्। अधि-शब्दश्च अन्यार्थे। यद्वा यद्धि यस्याधि तत्ततोऽन्यत् सामर्थ्यात्। यथा अधि भृत्यादीनां राजा। अव्यक्तमेव अविदितं ततोऽन्यदित्यर्थः।

विदितमविदितं च व्यक्ताव्यक्ते कार्य-कारणत्वेन विकल्पिते। ताभ्यामन्यद् ब्रह्म विज्ञान-स्वरूपं सर्व-

विशेष-प्रत्यस्तमितमित्ययं समुदायार्थः। अत एवात्मत्वाद् न हेय उपादेयो वा। अन्यद् हि अन्येन हेयमुपादेयं वा। न तेनैव तद् यस्य कस्यचिद् हेयमुपादेयं वा भवति। आत्मा च ब्रह्म सर्वान्तरात्मत्वाद् अविषयम्। अतः अन्यस्यापि न हेयमुपादेयं वा। अन्याभावाच्च।

इति शुश्रुम पूर्वेषाम् इत्यागमोपदेशः। व्याचचक्षिरे इत्यस्वातन्त्र्यं तर्क-प्रतिषेधार्थम्। ये नः तद् ब्रह्म उक्तवन्तः ते नित्यमेवागमं ब्रह्म-प्रतिपादकं व्याख्यातवन्तः, न पुनः स्व-बुद्धि-प्रभवेण तर्केण उक्तवन्त इत्यागम-पारम्पर्याविच्छेदं दर्शयति विद्या-स्तुतये। तर्कस्तु अनवस्थिताः (ब्र.सू. २.१.११) भ्रान्तोऽपि भवति इति।। ३ ।।

**आनन्दगिरिटीका**

न तत्र चक्षुर्गच्छति इतिवाक्यार्थं संगृह्णाति (- **न तत्र** इति)। आचार्येण उक्तेऽपि तत्वे शिष्यस्य अप्रतिपत्तेः हेतोः पर्यनुयोगे हेतुः न तत्र चक्षुर्गच्छित इति (अर्थः इति शेषः)। एतद्विवृणोति - **श्रोत्रस्य श्रोत्रम्** इत्यादिना। आत्मा नेन्द्रियविषयः अभोतिकत्वाद् नरविषाणवत्। मनश्च इन्द्रियं प्रसिद्धम्। ततः तस्याप्यविषयः इत्याह - **इन्द्रियाविषयत्वात्** इति। न विद्मो न विजानीमः इत्याद्यभ्यासः सर्वथा (प्ररेकत्वादिना केनापि रूपेण) अन्तःकरणाविषयत्व-ख्यापनार्थः। आक्षेप-परतया व्याख्याय शङ्कोत्तरत्वेन व्याचष्टे - **अथवा** इत्यादिना। इतः उपलक्षणप्रकारादन्येन प्रकारेण न शक्यते दर्शयितुं क्रियागुणादिविशेषशून्यत्वादित्यर्थः। आगमम् (सम्प्रदायागतम्) इति उपदेशपारम्पर्यमाह इति सम्बन्धः। आगमस्यार्थमाह - **विदिताविदिताभ्यामन्यत्वम्** इति। अन्यदात्मनो विदिथमविदिथं वा स्यात्। अतो विदितत्वाविदितत्वनिषेधेन आत्मनोऽन्यत्र ब्रह्मत्वं विदुषां विनिवर्त्य आत्मा ब्रह्म इत्युपदिष्टं भवति इत्यर्थः। (आत्मनोऽपि विदितत्वादिसम्भवादाक्षिप्य अन्यत्वं साधयति ।) विदितान्यत्वे युक्तिमाह - **यो हि** इत्यादिना। विदितादन्यत्व-वचनस्य आर्थिकमर्थमाह - **अपि च** इति। कार्याद् व्यावृत्तिः सिध्यति इत्यर्थः। आत्मा यद्यपि अन्यतो विज्ञानं नापेक्षते तथापि स्वग्राहकत्वात् स्वस्मादेव विज्ञानमपेक्षते। तेन विज्ञानानपेक्षवमसिद्धमित्याशङ्क्याह - **न च स्वत एव** इति। स्वभावतया अनपेक्षमेव सिद्धत्वात् अपेक्षाशब्दार्थः (अपेक्षाशब्दार्थः हि लिप्सा सा च लब्ध एव इति) न घटते। स्वग्राहकत्वं चासिद्धं स्ववृत्तिविरोधाद् (स्वस्मिन् स्वव्यापारे एकस्मिन् विरुद्धकर्मत्व-कर्तृत्व-प्रसङ्गात्) इत्यर्थः। विज्ञानं सजातीयानपेक्षप्रकाशं प्रकाशत्वात् प्रदीपवत् इत्यनुमानमभिप्रेत्य दृष्टान्तमाह - **न हि** इति। तमोध्वस्तये हि आलोकापेक्षा तदभावश्च आलोके स्वत एव सिद्ध इत्यर्थः। प्रदीपस्य तैजसस्य तैजसान्तरानपेक्षत्वेऽपि विजातीयप्रकाशस्य ज्ञानस्यापेक्षा स्वव्यवहारेऽपि (अपिना तमोध्वस्तिं दृष्टान्तयति) दृष्टा तथा ब्रह्मणोऽपि विजातीयज्ञानापेक्षा भविष्यति इति न च वाच्यमित्याह - **न च एवमात्मनः** इति। ब्रह्मणोऽन्यस्य सर्वस्य अज्ञानात्मकत्वाद् भानसम्भावनैव नास्ति अन्यत्र। ततो न विजातीयज्ञानापेक्षमपि ब्रह्म इत्यर्थः। ज्ञानानपेक्षत्वे लौकिकानुभवविरोधं शास्त्रविरोधं च उद्भाव्य परिहरति - **विरोध इति चेन्न अन्यत्वात्** इति। सूत्रस्य पूर्वपक्षभागं विभजते - **स्वरूपविज्ञाने** इत्यादिना। विज्ञानानपेक्षत्वं ब्रह्मणोऽभाणि। सापेक्षत्वं जीवशब्द-वाच्यस्य उपाधिविशिष्टस्य अनुभूयते। अतो भिन्न-विषयत्वाद् न विरोध इत्याह - **न, कस्मात्** इत्यादिना। बुद्ध्यादि-कार्यकरण-सङ्घाते यः आत्माभिमानसन्तानः अनादिभव(जन्म)परम्पराप्रापितः तस्याविच्छेद-रूपम् (अविच्छेदेन कार्येण रूप्यते गम्यते इत्यविच्छेदकारणमित्यर्थः। कार्यकारणयोरभेदाद् वा तद्रूपम्।) अनिर्वाच्यम् (नित्यचित्प्रकाशमये ब्रह्मणि कुतस्तदित्यतोऽज्ञानं विशिनष्टि - अनिर्वाच्यमिति। सन्नाप्यसन्न।) अज्ञान-लक्षणं चिह्नं यस्य चित्प्रतिबिम्बस्य स तथोक्तः। चित्तन्त्रं हि (प्रतिबिम्बावच्छिन्नावेकीकृत्य उक्तं स्फुटयति - चित्तन्त्रमित्यादिना। अज्ञोऽहमिति चिदधीनप्रतीतिकत्वात् तदेकतन्त्रं तत्। यथा मलिनादर्शादिः स्वावच्छिन्नमुखे मालिन्याद्यध्यासहेतुः भवति तद्वत्।) अनिर्वाच्यमज्ञानं चैतन्यमवच्छिद्य स्वावच्छिन्ने यथास्वरूपावभासं प्रतिबध्य मौढ्याद्यध्यासहेतुः भवति। तस्मात् (अज्ञानप्रयुक्तमौढ्याद्यध्यासवत्त्वात्) अविवेकात्मको जीव इत्युच्यते (स प्रतिबिम्ब इति शेषः।)। बुद्धेः अन्तःकरणस्य यथा यथा नीलपीताद्याकारावभासा जायन्ते तथा तथा चित्प्रतिबिम्बः प्रमातृत्वादिरूपेण भाति इति तत्प्रधानः, अध्यस्तस्य विशिष्टस्य (अविद्यान्तःकरणादिसहितस्य जीवस्य) तत्सत्तया एव सत्त्वाद् विशिष्टान्तर्निविष्टः य आत्मा नित्यचित्स्वरूपः स एव सारः (अबाध्योंऽशः) यस्मिन् स तथोक्तः। बुद्धिपरिणामरूपाणां नीलपीतादिप्रत्ययानाम् उत्पन्नविनाशत्वात् तदुपरक्तरूपेण अनित्यं

चैतन्यं यत्र अवभासते सोऽन्यो जीवः। सर्वाणि एतानि जीवविशेषणानि अन्यत्वस्फुटीकरणार्थानि। न केवलमनित्यत्वं विशिष्टोपाधि-रूढतया (तादात्म्येनोपरक्ततया) विज्ञानस्य, तद्धर्मतया एवावभासते, अपि तु मनुष्योऽहं जानामि इति प्रतिशरीरं विलक्षणमपि चैतन्यमवभासते विशिष्टभेदादित्यर्थः। परमार्थतः कीदृशं चैतन्यं यस्य विशिष्टधर्मता अवभासते तत्राह - **अन्तःकरणस्य** इति। ननु विशेषसम्बन्धात् स्वरूपे समारोपितो विशिष्टो भाति तस्य मिथ्यात्वात् कथमात्मत्व-व्यवहारास्पदत्वं तत्राह - **अन्तर्गतेन** इति। (बुद्ध्यादि) विशिष्टान्तर्गतेन चित्स्वरूपेण तादात्म्याद् बाह्य इत्यनात्मा अपि बुद्धिविशिष्टः आत्मा इत्युपगतो लौकिकैः इति सम्बन्धः। **अतः** इति। उक्तधर्मवत्वाद् अस्तु वित्यविज्ञानाद् विलक्षणो जीवः, कथमेतावता विरोधः परिहृतः इत्याकांक्षायामाह - **तत्र हि** इति। एवं लोकानुभवविरोधे परिहृतेऽपि शास्त्रविरोधो न परिहृत इत्याह - **तत्वमसि** इति। विशिष्टस्य मिथ्यात्वाद् ब्रह्मास्मीत्यनुभवायोगाद् मोक्षार्हत्वायोगाच्च तत्वमसीत्युपदेशो न घटते चेत् तर्हि ब्रह्मणः एव उपदेशोऽस्तु इत्याशङ्क्याह (निरुपाधिकस्य आत्मनः उपदेष्टुमशक्यत्वात् तत्वमस्याद्युपदेशकारीणि श्रुतिवाक्यानि निष्फलानि इति भावः शङ्काकर्तुः।) - **आत्मानमेवावेत्** इति। एवमादीनि वाक्यानि ब्रह्मोपदेशपक्षे न सङ्गच्छन्ते तज्जनितफलाभावादित्यर्थः (नित्यबोधात्मकत्वमित्यस्य अयं तात्पर्यः। वाक्यजं फलं बोध एव भवति। स निर्विकारे बोधात्मनि नोत्पत्तुं शक्नोति इति भावः।)। विशिष्टस्य निरुपाधिकस्य च ब्रह्मणः उपदेशासम्भवेऽपि उपाधिविशिष्ट-चित्स्वरूप-जीवपद-लक्ष्यस्य (उपहितस्य) वैशिष्ट्यद्वारेण उपदेशो भविष्यति, फलं तस्य आरोपित-बन्धविनृत्तिः इत्याह - **न लोकेति**। ननु लोकशब्देन आत्मा उच्यते अनात्मा वा। नाद्यः। अत्मनोऽधिष्ठानतया अध्यासकर्तृत्वासम्भवात्। चैत्रो हि शुक्तिकायां रजतमध्यस्यति न शुक्तकैव (आत्मा नाध्यासकर्ता अधिष्ठानत्वात् शुक्तिकावत् इति भावः।)। अध्यासकर्तृत्वे च आत्मनः प्रागेव अध्यासात् कर्तृत्वं वाच्यम्, कर्तृत्वस्य प्राग्भावनियमात्। तदा च अनिर्मोक्षप्रसङ्गः। कर्तृत्वस्य अध्यासत्वे च न कर्तृत्वमात्मनः तद्विषयकर्तृत्वान्तराभावात्। (कृतिविषयकृत्युपगमे दोषमाह - भावे च इति) भावे च अनवस्थानात्। न द्वितीयः। जडत्वाद् अनात्मनोऽध्यास-कर्तृत्वानुपपत्तेः (अनात्मा नाध्यासाश्रयः जडत्वाद् घटादिवत्)। चेतनो हि देवदत्तः अध्यस्यति इति प्रसिद्धम्। अथ जडस्य अध्यासकर्तृत्वं नाम भ्रान्त्याश्रयत्वं यद्यपि न सम्भवति तथापि भ्रान्ति-निमित्तत्वं दृष्टं जपाकुसुमादेः। न, तस्य सत्यस्य उपाधित्वासम्भवात् भाष्यकारमते च जडस्य सर्वस्य अध्यासात्मकत्वाद् अध्यासहेतुत्वं न सम्भवति। तस्माद् असम्बद्धमिदं भाष्यं लोकाध्यारोपापोहार्थत्वादिति। न। लोकशब्देन अहङ्कारादय उच्यन्ते। तेषां व्यावहारिक-सत्यत्वस्य अर्थक्रिया-समर्थत्वेन अभ्युपगमात्। स्वधर्मारोपित-निमित्तत्वेन उपाधित्वसम्भवात् परमार्थसत्यस्यैव उपाधित्वमिति अस्मान् प्रति दृष्टान्ताभावाद् अहङ्कारादयश्च चित्तन्त्रानाद्यनिर्वाच्याविद्यामय-भूतसूक्ष्म-विकाराः अविद्यावच्छिन्न एव चैतन्ये निपतन्ति (चैतन्यमाश्रयन्ति)। उपाधिविकाराणाम् उपहिते पक्षपातिताया दर्शनात्। यथा जलचलनादीनाम्। तस्मान्नासङ्गतं भाष्यम्। ननु बोधात्मनो नाबोधः समञ्जसः प्रकाशाप्रकाशयोः विरोध-प्रसिद्धेः। बोधोऽपि च बोधात्मनः न समञ्जसः। निर्विकारत्वात्। कथं बोधात्मनः बोधोपदेशः सार्थकः तत्राह - **तत्र च** इति। बोधाद् अन्यस्य अबोधात्मकत्वेन अबोधाश्रयत्वं न समञ्जसम्। आत्माश्रयत्वप्रसङ्गात्, अनिवृत्तिप्रसङ्गाच्च तस्य बोधासम्भवात्। तस्माद् बोधात्मनः एव अबोधः समञ्जसः परिशेषात् विरोधश्च असिद्धः, साक्षिवेद्यत्वात् (न हि दृष्टे अनुपपन्नं नाम इति भावः)। बोधोऽपि तत्रैव समञ्जसो घटादेः बोद्धृत्वाप्रसिद्धेः। चिद्व्याप्ते एव बुद्धिपरिणामे बोधशब्द-व्युत्पत्तेः। परिणाम्यन्तः-करणोपहितस्य बोधात्मनः बोधवत्वं समञ्जसमित्यर्थः। सामञ्जस्ये हेत्वन्तरम् आह - **अन्यनिमित्तत्वात्** इति। अन्यत्र अहङ्कारादिसङ्घाते वादिनां लौकिकानां च बोधाबोधौ प्रसिद्धौ। तौ च आत्मबोधाबोध-सम्बन्धाद् इत्यात्मनो मुख्यौ बोधाबोधौ। यत्सम्बन्धादन्यत्र यदुपचर्यते तत्तत्र मुख्यं यथा अग्निसम्बन्धाद् उदकस्य औष्ण्यमुपचारेण अग्नौ तन्मुख्यम् इत्यर्थः। आत्मनिमित्तौ चेद् अन्यत्र बोधाबोधौ तर्हि निमित्तत्वाद् आत्मनो व्यापारवत्त्व-प्रसङ्गस्तत्राह - **रात्र्यहनी इव** इति। यथा आदित्यसन्निध्यसन्निधि-मात्र-निमित्ते लोके रात्र्यहनी भवतः। न हि आदित्यः कञ्चन स्वापयति उत्थापयति वा। अतो निमित्तत्वं न व्यापारवत्वाविनाभूतमित्यर्थः (अविनाभूतं - व्याप्ततम् यत्र निमित्तत्वं तत्र व्यापारवत्वमिति न।)। ननु आत्मनि बोधस्य नित्यत्वे कथं कालावच्छेदव्यवहारः प्रागज्ञासिषं शास्त्रार्थम् इदानीं च जानामि पुनर्ज्ञास्यामि इति तत्राह दृष्टान्तम् - **नित्यावौष्ण्यप्रकाशौ** इति। तद्विषयस्य कालावच्छिन्नत्वेन कालावच्छेद-व्यवहारः स्वरूपेण नित्येऽपि बोधे न विरुध्यते इत्यर्थः। आत्मनि बोधाबोधयोः सामञ्जस्ये किं सिद्धमित्यत आह - **एवं च** इति। आगन्तुक-विषयसंबन्धात् तदुपरक्तरूपेण बोधस्य आगन्तुकत्वेऽपि इदानीं मया स्वात्मा बुध्यते इति नित्यबोधात्मनि कथं

बोधकर्तृत्व-व्यपदेशः इत्याशङ्क्य आवरकापनयस्य आगन्तुकत्वेन भविषयति इत्याह - **यथा सविता असौ** इति। यस्मादन्योपाधिकमात्मनि बोधकर्तृत्वं। स्वतः पुनः विज्ञानानपेक्षत्वमेव। तस्माद् विज्ञानानपेक्षत्वाद् अविदितादन्यत्वं सिद्धम्। कथमन्यत्वविवक्षायाम् अधिशब्दः सङ्गच्छते तत्राह - **अधिशब्दश्च** इति। निपातानामनेकार्थत्वाद् लक्षणया च इत्यर्थः। अविदितादन्यत्वस्य आर्थिकमर्थमाह - **अव्यक्तमेव** इति। विदितं न भवति अविदितं च न भवति इत्येकैकनिषेधस्य तात्पर्यमुक्त्वा समुदायार्थमाह - विदितमविदितं च इति। व्याचचक्षिरे इत्यस्वातन्त्र्यं तर्कप्रतिषेधार्थमित्येतत्सूत्रं विवृणोति - **ये नः तत्** इति। (३)

## १.४

**पदभाष्यम् अवतरणिका**

"अन्यदेव तद्विदितादथो अविदितादधि" इत्यनेन वाक्येन आत्मा ब्रह्म इति प्रतिपादिते श्रोतुराशङ्का जाता - तत्कथं न्वात्मा ब्रह्म। आत्मा हि नामाधिकृतः कर्मण्युपासने च, संसारी, कर्मोपासनं वा साधनमनुष्ठाय ब्रह्मादि-देवान् स्वर्गं वा प्राप्तुमिच्छति। तत्तस्मादन्य उपास्यः विष्णुः ईश्वरः इन्द्रः प्राणः वा ब्रह्म भवितुमर्हति, नत्वात्मा। लोक-प्रत्यय-विरोधात्। यथा अन्ये तार्किकाः ईश्वरादन्य आत्मा इत्याचक्षते तथा कर्मिणः "अमुं यज, अमुं यज" इत्यन्या एव देवता उपासते। तस्माद्युक्तं यद्विदितमुपास्यं तद् ब्रह्म भवेत्। ततोऽन्य उपासकः इति। तामेतामाशङ्कां शिष्य-लिङ्गेनोपलक्ष्य तद्वाक्याद्वा आह, मैवं शङ्किष्ठाः -

**यद्वाचानभ्युदितं येन वागभ्युद्यते।**

**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।। १.४।।**

**पदभाष्यम्**

यत् चैतन्य-मात्र-सत्ताकम्, वाचा वागिति जिह्वामूलादिष्वष्टसु स्थानेषु विषक्तमाग्नेयं वर्णानामभिव्यञ्जकं करणम्। वर्णाश्च अर्थ-सङ्केत-परिच्छिन्ना एतावन्त एवं क्रम-प्रयुक्ता इति। एवं तदभिव्यङ्ग्यः शब्दः पदं वागिति उच्यते। "अकारो वै सर्वा वाक्, सैषा स्पर्श-अन्तःस्थ-ऊष्मभिः व्यज्यमाना बह्वी नाना-रूपा भवति" (ऐ.आ. २.३.७.१३) इति श्रुतेः। मितम् अमितं स्वरः सत्यानृते एष विकारो यस्यास्तया वाचा पदत्वेन परिच्छिन्नया करण-गुणवत्या अनभ्युदितम् अप्रकाशितमनभ्युक्तम्। येन ब्रह्मणा विवक्षितेऽर्थे सकरणा वाग् अभ्युद्यते चैतन्य-ज्योतिषा प्रकाश्यते प्रयुज्यते इत्येतत्। "यद्वाचो ह वाग्" इत्युक्तम्। "वदन्वाक्" (बृ. १.४.७), "यो वाचमन्तरो यमयति" (बृ. ३.७.१७), इत्यादि च वाजसनेयके। "या वाक् पुरुषेषु सा घोषेषु प्रतिष्ठिता कश्चित्तां वेद ब्राह्मणः" इति प्रश्नमुत्पाद्य प्रतिवचनमुक्तं "सा वाग्यया स्वप्ने भाषते" इति।

सा हि वक्तुर्वक्तिर्नित्या वाक् चैतन्य-ज्योतिः-स्वरूपा। "न हि वक्तुर्वक्तेर्विपरिलोपो विद्यते" (बृ. ४.३.२६) इति श्रुतेः। तदेव आत्म-स्वरूपं ब्रह्म निरतिशयं भूमाख्यं, बृहत्त्वात् ब्रह्मेति विद्धि विजानीहि त्वम्। यैर्वागाद्युपाधिभिः वाचो ह वाक्, चक्षुषश्चक्षुः, श्रोत्रस्य श्रोत्रं, मनसो मनः, कर्त्ता, भोक्ता, विज्ञाता, नियन्ता, प्रशासिता, विज्ञानमानन्दं ब्रह्म, इत्येवमादयः संव्यवहाराः असंव्यवहारे निर्विशेषे परे साम्ये ब्रह्मणि प्रवर्त्तन्ते तान् व्युदस्य आत्मानमेव निर्विशेषं ब्रह्म विद्धीति एव-शब्दार्थः। नेदं ब्रह्म यदिदम् इत्युपाधि-भेद-विशिष्टम् अनात्मेश्वरादि उपासते ध्यायन्ति। तदेव ब्रह्म त्वं विद्धि इत्युक्तेऽपि नेदं ब्रह्म इत्यनात्मनोऽब्रह्मत्वं पुनरुच्यते, नियमार्थम्, अन्य-ब्रह्म-बुद्धि-परिसङ्ख्यानार्थं वा।। १.४ ।।

**आनन्दगिरिटीका**

उक्तवाक्यार्थे लौकिक-तार्क्किक-मीमांसक-प्रतिपत्तिविरोधमाशङ्क्य परिहरति विदितादन्यत्वप्रपञ्चनाय - **अन्यदेव तद्विदितात्** इत्यादिना। अष्टसु स्थानेषु इति। "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च" ।। (पा.शिक्षा १३) इत्येतेषु आकाशप्रदेशेषु आश्रितमित्यनेन आकाशोपादानत्वं सूचितम्। **आग्नेयम्** इति। अग्निदेवताकमित्यर्थः। न केवलं करणं वागुच्यते वर्णाश्च

उच्यन्ते इत्याह - **वर्णाश्च** इति। तदुक्तम् - "यावन्तो यादृशा ये च यदर्थप्रतिपादकाः। वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः"।। (श्लोक.वा। स्फोटवाद का. ६९) इति। गौरितिपदं गकारौकारविसर्जनीयाः एवं क्रमविशेषावच्छिन्नाः इति मीमांसकाद्यनुसारेण उक्तं स्फोटवादिनोऽनुसारेणाह - **तदभिव्यङ्ग्यः** इति। स्फुट्यते व्यज्यते वर्णैः इति स्फोटः पदादिबुद्धिप्रमाणकः (आदिना वाक्यग्रहः। गौरित्येकं पदमित्येकत्वप्रकारिका या पदादिबुद्धिः सैव प्रमाणं यत्र स इत्यर्थः।)। एकरूपायाः बुद्धेः अनेकवर्णावलम्बनत्वासम्भवादिति भावः। उक्ते वाक्यार्थे श्रुतिसम्मतिमाह - **अकार** इति। अकार-प्रधानोंकारोपलक्षिता स्फोटाख्या चिच्छक्तिः सर्वा वाक्। सैषा स्पर्शान्तस्थोष्मभिः व्यज्यमाना। कादयो मावसानाः स्पर्शाः, यरलवाः अन्तस्थाः, शषसहा ऊष्माणः, तैः क्रमविशेषावच्छिन्नैः व्यज्यमाना (चिच्छक्तिः) नानारूपा विवर्तते। मितम् ऋगादि पादावसान-नियताक्षरत्वात्। अमितं यजुराद्यनियताक्षर-पादावसानत्वात्। स्वरः साम गीतिप्राधान्यात्। सत्यं यथादृष्टार्थवचनम्। अनृतं तद्विपरीतम्। करणं वागिन्द्रियं गुणः उपसर्जनं यस्याः सा करणगुणवती (वाग्रूपकरणनिर्वर्त्यापि अप्रधानं पदरूपा एव वाग् इत्युच्यते प्राधान्येन।)। पुरुषेषु चेतनेषु या चिच्छक्तिः सा घोषेषु वर्णेषु प्रतिष्ठिता, तद्व्यङ्ग्यत्वादित्यर्थः। तदेव इत्येवकारस्य कृत्यमाह - **यैः वागाद्युपाधिभिः** इति। **नियमार्थम्** इति। पक्षे अनात्मन्यपि ब्रह्मबुद्धौ प्राप्तायाम् (तदेव ब्रह्म इति वाक्यार्थविस्मरणवेलायां प्राक्तन-संस्कार-पाटवादनात्मनि देहादावपि आत्मबुद्धौ प्राप्तायाम्) आत्मैव ब्रह्म इति बुद्धिं नियन्तुमित्यर्थः। अन्यस्मिन् उपास्ये या ब्रह्मबुद्धिः (प्राणो ब्रह्म मनो ब्रह्म इत्येवमादिवाक्याद् उपास्ये प्राणादौ अपि तत्त्वतो या ब्रह्मबुद्धिः प्राप्ता) तन्निवृत्त्यर्थं वा पुनः अब्रह्मत्वमुच्यते इत्यर्थः। (४)

### वाक्यभाष्यम्

### वागविषयत्वं वाक्प्रकाशकत्वं च ब्रह्म

यद्वाचा इति मन्त्रानुवादो दृढ-प्रतीतेः। अन्यदेव तद्विदितात् इति योऽयमागमार्थो ब्राह्मणोक्तोऽस्यैव द्रढिम्ने मन्त्राः यद्वाचा इत्यादयः पठ्यन्ते। यद् ब्रह्म वाचा शब्देन अनभ्युदितम् अनभ्युक्तम् अप्रकाशितमित्येतत्। येन वाग् अभ्युद्यते इति वाक्प्रकाश-हेतुत्वोक्तिः। येन प्रकाश्यते इति वाचोऽभिधानस्य अभिधेय-प्रकाशकत्वस्य हेतुत्वमुच्यते ब्रह्मणः। उक्तं च केनेषितां वाचमिमां वदन्ति, यद्वाचो ह वाचम् इति। तदेव ब्रह्म त्वं विद्धि इत्यविषयत्वेन ब्रह्मण आत्मन्यवस्थापनार्थ आम्नायः। यद्वाचानभ्युदितं, वाक्प्रकाश-निमित्तं चेति ब्रह्मणोऽविषयत्वेन वस्त्वन्तर-जिघृक्षां निवर्त्य स्वात्मन्येव अवस्थापयति आम्नायः, तदेव ब्रह्म त्वं विद्धि इति यत्नतः उपरमयति, नेदम् इत्युपास्य-प्रतिषेधाच्च।। ४ ।।

### आनन्दगिरिटीका

यद्वाचेतिमन्त्रानुवादः दृढप्रतीतेः इति सूत्रमेतद्विभजते - **अन्यदेव** इत्यादिना। येन वागभ्युद्यते इत्यनेन वाक्प्रकाशे हुतुत्वोक्तिः ब्रह्मणः क्रियते इति योजना। एतत्सूत्रं विवृणोति - **येन** इत्यादिना। तदेव ब्रह्म त्वं विद्धि इत्याद्याम्नायः आत्मन्येव बुद्धेः अवस्थापनार्थः उपसंहारार्थः। अविषयत्वेन ब्रह्मणः अतिरिक्तस्वरूपेण वेद्यत्वासम्भवाद् इति योजना। एतत्सूत्रं विभजते - **यद्वाचा** इत्यादिना।

## १.५

**यन्मनसा न मनुते। येनाहुर्मनोमतम्।**

**तदेव ब्रह्म त्वं विद्धि। नेदं यदिदमुपासते।। १.५ ।।**

**पदभाष्यम्**

यत्[२.१] मनसा न मनुते। मनः इत्यन्तःकरणं बुद्धि-मनसोरेकत्वेन गृह्यते। मनुतेऽनेन इति मनः, सर्व-करण-साधारणं, सर्व-विषय-व्यापकत्वात्। "कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा, धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव" (बृ. १.५.३) इति श्रुतेः कामादि-वृत्तिमन्मनः। तेन मनसा यत् चैतन्य-ज्योतिर्मनसोऽवभासकं न मनुते न सङ्कल्पयति, नापि निश्चिनोति लोकः, मनसोऽवभासकत्वेन नियन्तृत्वात्। सर्व-विषयं प्रति प्रत्यगेवेति स्वात्मनि न प्रवर्त्ततेऽन्तः-करणम्। अन्तःस्थेन हि चैतन्य-ज्योतिषा अवभासितस्य मनसो मनन-सामर्थ्यम्। तेन सवृत्तिकं मनः येन

ब्रह्मणा मतं विषयी-कृतं व्याप्तम् आहुः कथयन्ति ब्रह्म-विदः। तस्मात् तदेव मनस आत्मानं

प्रत्यक्चेतयितारं ब्रह्म विद्धि। नेदम् इत्यादि पूर्ववत्।। १.५ ।।

**आनन्दगिरिटीका (५-८)**

सर्वं स्पष्टमिति न व्याख्यातम्। (५-६)

**वाक्यभाष्यम्**

यन्मनसा इत्यादि समानम्। मनो मतम् इति। येन ब्रह्मणा मनोऽपि विषयीकृतं नित्य-विज्ञान-स्वरूपेण इत्येतत्। सर्वकरणानामविषयं तानि च सव्यापाराणि सविषयाणि नित्य-विज्ञान-स्वरूपावभासतया येनावभास्यन्ते इति श्लोकार्थः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति (गी. १३.३३) इति स्मृतेः। तस्य भासा (मु. २.२.१०) इति चाथर्वणे।। ५ ।।

**आनन्दगिरिटीका (५-८)**

मन्त्रसमुदायस्य (यन्मनसा इत्यादिचतुर्णां मन्त्राणाम्) अर्थमाह - **सर्वकरणानाम्** इत्यादिना। यत् सर्वकरणानामविषयः येन निर्विशेषेण सर्वाणि करणानि भास्यन्ते तद् ब्रह्मैव त्वम्। ततः (तदा एव ब्रह्मत्वात्) (विद्धीति पदस्य यत्नोपरमलक्षकत्वमेव स्फुटयन्नाह - अतिरिक्तमिति। यत्नोपरमः लक्ष्यः। यन्मनसा इत्यादिना सर्वकरणाविषयत्वख्यापनाद् ब्रह्म विद्धि इति वक्तुमशक्यत्वाद् अतिरिक्तं मा विद्धि इति लक्षणा - अन्यथानुपपत्त्या। वीतराग(स्य)जन्मादर्शनात् (इति आत्मनः नित्यत्वसाधक) न्यायसूत्रम्) इत्यस्य सराग-जन्म-दर्शनादितिवत्।) अतिरिक्तज्ञानाय यत्नो न कर्तव्यः इति यत्नोपरमः एव (मन्त्रेण) लक्ष्यते। विद्धीत्यनेन अतिरिक्तं मा विद्धि इत्यभिप्रायः। (५-८)

**१.६**

**यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।**

**तदेव ब्रह्म त्वं विद्धि। नेदं यदिदमुपासते।। १.६ ।।**

**पदभाष्यम्**

यत्[२.१] चक्षुषा न पश्यति न विषयी-करोति अन्तः-करण-वृत्ति-संयुक्तेन लोकः। येन चक्षूंषि अन्तः-करण-वृत्ति-भेद-भिन्नाः चक्षुर्वृत्तीः[२.३] पश्यति चैतन्यात्म-ज्योतिषा विषयी-करोति व्याप्नोति। तदेव इत्यादि पूर्ववत्।। ६ ।।

**१.७**

**यच्छ्रोत्रेण न श्रृणोति। येन श्रोत्रमिदं श्रुतम्।**

**तदेव ब्रह्म त्वं विद्धि। नेदं यदिदमुपासते।। १.७ ।।**

**पदभाष्यम्**

यत्[२.१] श्रोत्रेण न श्रृणोति दिग्देवताधिष्ठितेन आकाश-कार्येण मनो-वृत्ति-संयुक्तेन न विषयी-करोति

लोकः। येन श्रोत्रमिदं श्रुतं यत्प्रसिद्धं चैतन्यात्म-ज्योतिषा विषयी-कृतम्। तदेव इत्यादि पूर्ववत्।। ७

।।

## १.८

**यत्प्राणेन न प्राणिति। येन प्राणः प्रणीयते।**

**तदेव ब्रह्म त्वं विद्धि। नेदं यदिदमुपासते।। १.८ ।।**

**पदभाष्यम्**

यत् प्राणेन घ्राणेन पार्थिवेन नासिका-पुटान्तरवस्थितेन अन्तः-करण-प्राण-वृत्तिभ्यां सहितेन यद् न प्राणिति गन्धवन्न विषयी-करोति। येन चैतन्यात्म-ज्योतिषा अव-भास्यत्वेन स्व-विषयं प्रति प्राणः प्रणीयते। तदेव इत्यादि सर्वं समानम्।। ८ ।।

**वाक्यभाष्यम् (६-८)**

येन प्राणः इति क्रिया-शक्तिरप्यात्म-विज्ञान-निमित्तेत्यतत्।। ६-८ ।।

# अध्याय २

**पदभाष्यावतरणिका**

एवं हेयोपादेय-विपरीतः त्वमात्मा ब्रह्म इति प्रत्यायितः शिष्यः अहमेव ब्रह्म इति सुष्ठु वेद अहं इति मा गृह्णीयाद् इत्याशयादाह आचार्यः शिष्य-बुद्धि-विचालनार्थं यदीत्यादि।

**ब्रह्मणोऽवेद्यत्वे हेतुः**

**आक्षेपः**

ननु इष्टैव सुवेदाहमिति निश्चिता प्रतिपत्तिः।

**समाधानम्**

सत्यम् इष्टा निश्चिता प्रतिपत्तिः, न हि सुवेदाहमिति। यद्धि वेद्यं वस्तु विषयीभवति, तत् सुष्ठु वेदितुं शक्यम्। दाह्यम् इव दग्धुम् अग्नेर्दग्धुः, न त्वग्नेः स्वरूपमेव। सर्वस्य हि वेदितुः स्वात्मा ब्रह्मेति सर्व-वेदान्तानां सुनिश्चितोऽर्थः। इह च तदेव प्रतिपादितं प्रश्न-प्रतिवचनोक्त्या "श्रोत्रस्य श्रोत्रम्" इत्याद्यया। "यद्वाचानभ्युदितम्" इति च विशेषतः अवधारितम्। ब्रह्मवित्सम्प्रदाय-निश्चयश्चोक्तः "अन्यदेव तद्विदितादथो अविदितादधि" इति। उपन्यस्तमुपसंहरिष्यति च "अविज्ञातं विजानतां

विज्ञातम् अविजानताम्" इति। तस्माद्युक्तमेव शिष्यस्य सुवेद इति बुद्धिं निराकर्त्तुम्।

न हि वेदिता वेदितुः वेदितुं शक्योऽग्निः दग्धुः इव दग्धुमग्नेः। न चान्यो वेदिता ब्रह्मणोऽस्ति यस्य वेद्यमन्यत् स्याद् ब्रह्म। "नान्यदतोऽस्ति विज्ञातृ" (बृ. ३.८.११) इत्यन्यो विज्ञाता प्रतिषिध्यते। तस्मात् सुष्ठु वेदाहं ब्रह्म इति प्रतिपत्तिर्मिथ्यैव। तस्माद् युक्तमेवाहाचार्यो यदीत्यादि -

## २.१

**यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं**

**यदस्य त्वं यदस्य देवेषु। अथ नु मीमांस्यमेव ते। मन्ये विदितम्।। २.१ ।।**

**पदभाष्यम्**

यदि कदाचिद् मन्यसे सुवेदेति सुष्ठु वेदाहं ब्रह्म इति। कदाचिद् यथाश्रुतं दुर्विज्ञेयमपि क्षीण-दोषः सुमेधाः कश्चित् प्रतिपद्यते, कश्चिन्न, इति साशङ्कमाह - यदि इत्यादि। दृष्टं च "य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच। एतदमृतमभयम् एतद् ब्रह्म" (छा. ८.७.४) इत्युक्ते प्राजापत्यः पण्डितोऽप्यसुर-राड् विरोचनः स्वभाव-दोष-वशाद् अनुपपद्यमानमपि विपरीतमर्थं शरीरमात्मा इति प्रतिपन्नः। तथेन्द्रो देव-राट् सकृद् द्विस्त्रिरुक्तं चाप्रतिपद्यमानः स्वभाव-दोष-क्षयमपेक्ष्य चतुर्थे पर्याये प्रथमोक्तमेव ब्रह्म प्रतिपन्नवान्। लोकेऽपि एकस्माद् गुरोः श्रृण्वतां कश्चिद्यथावत् प्रतिपद्यते,

कश्चिदयथावत्, कश्चिद्विपरीतं, कश्चिन्न प्रतिपद्यते। किमु वक्तव्यम् अतीन्द्रियमात्म-तत्त्वम्। अत्र हि विप्रतिपन्नाः सदसद्वादिनः तार्किकाः सर्वे। तस्माद् विदितं ब्रह्म इति सुनिश्चितोक्तमपि विषम-प्रतिपत्तित्वाद् यदि मन्यसे इत्यादि साशङ्कं वचनं युक्तमेव आचार्यस्य।

दहरम् अल्पम् एव अपि नूनं त्वं वेत्थ जानीषे ब्रह्मणो रूपम्।

**ब्रह्मण औपाधिकभेदनिरूपणम् स्वतो निर्धर्मकत्वप्रतिपादनं च**

**आक्षेपः**

किमनेकानि ब्रह्मणो रूपाणि महान्त्यर्भकाणि च, येनाह दहरमेवेत्यादि?

**समाधानम्**

बाढम्। अनेकानि हि नाम-रूपोपाधि-कृतानि ब्रह्मणो रूपाणि, न स्वतः। स्वतस्तु "अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत्" (क. १.३.१५ नृ.उ.ता. ९, मुक्तिकोप. २.७२) इति शब्दादिभिः सह रूपाणि प्रतिषिध्यन्ते।

**आक्षेपः**

ननु येनैव धर्मेण यद्रूप्यते तदेव तस्य स्वरूपमिति ब्रह्मणोऽपि येन विशेषेण निरूपणं तदेव तस्य स्वरूपं स्याद्, अतः उच्यते। चैतन्यं पृथिव्यादीनाम् अन्यतमस्य सर्वेषां विपरिणतानां वा धर्मो न भवति। तथा श्रोत्रादीनामन्तः-करणस्य च धर्मो न भवतीति ब्रह्मणो रूपमिति ब्रह्म रूप्यते चैतन्येन। तथा चोक्तं "विज्ञानमानन्दं ब्रह्म" (बृ. ३.९.२८), "विज्ञान-घन एव" (बृ. २.४.१२), "सत्यं ज्ञानमनन्तं ब्रह्म" (तै. २.१.१), "प्रज्ञानं ब्रह्म" (ऐ. ३.१.३) इति च ब्रह्मणो रूपं निर्दिष्टं श्रुतिषु।

**समाधानम्**

सत्यमेवम्। तथापि तद् अन्तःकरण-देहेन्द्रियोपाधि-द्वारेणैव विज्ञानादि-शब्दैर्निर्दिश्यते, तदनुकारित्वाद् देहादि-वृद्धि-सङ्कोचोच्छेदादिषु नाशेषु च, न स्वतः। स्वतस्तु "अविज्ञातं विजानतां विज्ञातमविजानताम्" (के. २.३) इति स्थितं भविष्यति।

यद् अस्य ब्रह्मणो रूपमिति पूर्वेण सम्बन्धः। न केवलमध्यात्मोपाधि-परिच्छिन्नस्यास्य ब्रह्मणो रूपं त्वम् अल्पं वेत्थ, यद् अपि अधिदैवतोपाधि-परिच्छिन्नस्य अस्य ब्रह्मणो रूपं देवेषु वेत्थ त्वं, तदपि नूनं दहरमेव वेत्थ इति मन्येऽहम्। यदध्यात्मं यदपि देवेषु तदपि च उपाधि-परिच्छिन्नत्वाद् दहरत्वाद् न निवर्त्तते। यत्तु विध्वस्त-सर्वोपाधि-विशेषं शान्तम् अनन्तमेकमद्वैतं भूमाख्यं नित्यं ब्रह्म न तत् सुवेद्यमित्यभिप्रायः। यत एवं अथ नु तस्मात् मन्ये अद्यापि मीमांस्यं विचार्यम् एव ते तव ब्रह्म। एवमाचार्योक्तः शिष्य एकान्ते उपविष्टः समाहितः सन् यथोक्तमाचार्येण आगममर्थतो विचार्य, तर्कतश्च निर्धार्य स्वानुभवं कृत्वा, आचार्य-सकाशमुपगम्य, उवाच - मन्ये अहम् अथेदानीं विदितं ब्रह्मेति।। २.१ ।।

**आनन्दगिरिटीका**

वेदितुः स्वरूपत्वे ब्रह्मणो मा भूद्विषयत्वम्। (किन्तु ब्रह्मणः वेदितुः) स्वरूपत्वे मानाभावात्। अतिरिक्तस्य विषयत्वे किमनुपपन्नमित्याशङ्क्याह - **सर्वस्य हि** इति। यदिशब्दप्रयोगे किं कारणमित्यत आह - **कदाचित्** इति। अक्षिणि शरीरस्य प्रतिच्छाया दृश्यते इति प्रसिद्धवदुपदेशात् (यथा प्रसिद्धं गवाद्युपदिश्यते इयं गोः इति तद्वद् अयमक्षिणि दृश्यमानः आत्मा इत्युपदेशादित्यर्थः।) शरीरमात्मेति प्रतिपन्नः। छायायाः व्यभिचारित्वं बुद्ध्वा इत्यर्थः

(अक्षिदृश्यच्छाया आत्मा इत्युपदिष्टे शरीरस्य आत्मत्वप्रतिपत्तौ हेतुमाह - छायाया इति। अनुभूयमानेऽपि आत्मनि अक्ष्यसन्निधाने छाया नानुभूयते इत्येवं तस्याः व्यभिचारित्वादित्यर्थः।)। **सकृत्** इति। "य एषोऽक्षिणि पुरुषो दृश्यते" इत्येकवारमुक्तम्, "य एष स्वप्ने महीयमानश्चरति" इति द्वितीयेनोक्तम्, "तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः" इति त्रिरुक्तमपि आत्मानमप्रतिपद्यमानः इन्द्रो ब्रह्मचर्येण अधर्मादिदोषक्षयमपेक्ष्य चतुर्थे पर्याये "एषः सम्प्रसादोऽस्मात् शरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य" इत्यत्र प्रथमपर्यायोक्तमेव ब्रह्म प्रतिपन्नवान् इत्यर्थः। **अर्भकाणि च** इति। अल्पानि। न स्वतो रूपमस्ति ब्रह्मणः इत्युक्तं तदाक्षिपति - **ननु येनैव** इति। केन तर्हि विशेषेण ब्रह्मणो निरूपणमित्याकाङ्क्षायां चैतन्यरूपेण इत्याह - **चैतन्यम्** इति। भूतानां समस्तानां व्यस्तानां वा देहाकारपरिणतानां चैतन्यं धर्मो न भवति इति बहिरनुपलम्भात् तद्धर्मत्वे रूपादिवत् तत्साधकत्वाभावप्रसङ्गाच्च। तथा श्रोत्रादीनामपि (अन्तःकरणस्य च) भौतिकत्वाविशेषात् चैतन्यं धर्मो न भवति इति पारिशेष्यात् स्वतन्त्रचैतन्यं (स्वतन्त्रं - देहाद्यधर्मत्वेन तदनधीनता) ब्रह्मणो रूपम्। तत्र श्रुतिसम्मतिमाह - **तथा चोक्तम्** इति। सत्यमेवं चैतन्यं पारमार्थिकं (अनौपाधिकम्) ब्रह्मरूपं श्रुतितात्पर्यगम्यं तथापि यदुक्तं ब्रह्मणो रूपं कथं नास्तीति तदुपाधिद्वारेणैव ब्रह्मणः शब्देन निरूपणं निर्देशनं न स्वतः इत्यभिप्रेत्य अन्तःकरणाद्यभिव्यक्तिमुपलभ्य हि यदुपाध्यभिव्यक्तिनिमित्तं चैतन्यं तद्ब्रह्मेति निर्दिश्यते इत्यर्थः। ननु उपाधिः उपहितसंबद्धो भवति। चैतन्यस्य तु असङ्गस्य कथं देहादिः उपाधिः इत्याशङ्क्याह - **तदनुकारित्वात्** इत्यादिना। यथा जले कम्पमाने सविता कम्पते इव भिद्यमाने भिद्यते इव इति मिथ्यातद्धर्मभागित्वात् सवितुः जलमुपाधिः इत्युच्यते न तु संबन्धात् (तथोक्तिः) दूरस्थयोः (जलसूर्ययोः) संयोगाद्ययोगात्। तद्वद् देहादेः वृद्धिसंकोचच्छेदादिषु दाहादिषु नाशेषु चैतन्यस्य मिथ्यादेहधर्मभागित्वाद् देहादेः उपाधित्वमभिधीयते इत्यर्थः। ननु न स्वतः चैतन्यतया निरूप्यते ब्रह्म कथं तर्हि तदनुभवः (निरुपाधिकब्रह्मानुभवः) इत्याशङ्क्याह - **स्वतस्तु** इति। अविषयतयैव विषयानुपरक्तचित्स्फुरणं ब्रह्मानुभवः इत्यर्थः। **तर्कतश्च** इति। वेद्यत्वे घटादिवद् अनात्मत्वादिप्रसङ्गात् (यद्वेद्यं तदनात्मभूतं यथा घटः) इत्यादितर्कतः आत्मनो वेद्यं ब्रह्म न भवत्येवेति निर्धार्य अज्ञानसंशयाद्यभावेन स्वानुभवं कृत्वा इत्यर्थः (आत्मत्वात् स्वप्रकाशत्वाच्च अविदितं न सम्भवति ब्रह्म इति तर्कनिश्चयः ग्राह्यः) । (१)

**वाक्यभाष्यम्**

**सूत्रवाक्यम्**

यदि मन्यसे सुवेद इति शिष्य-बुद्धि-विचालना गृहीत-स्थिरतायै।

**विवरणवाक्यम्**

विदिताविदिताभ्यां निवर्त्य बुद्धिं शिष्यस्य, स्वात्मन्यवस्थाप्य, तदेव ब्रह्म त्वं विद्धि इति स्वाराज्ये अभिषिच्य उपास्य-प्रतिषेधेन, अथास्य बुद्धिं विचालयति।

यदि मन्यसे सुवेद अहं ब्रह्म इति त्वं, ततोऽल्पमेव ब्रह्मणो रूपं वेत्थ त्वम् इति नूनं निश्चितं मन्यते इत्याचार्यः। सा पुनः विचालना किमर्था इत्युच्यते - पुर्व-गृहीते वस्तुनि बुद्धेः स्थिरतायै।

देवेषु अपि सुवेदाहम् इति मन्यते यः, सोऽपि अस्य ब्रह्मणो रूपं दहरमेव वेत्ति नूनम्। कस्मात् अविषयत्वात् कस्यचिद् ब्रह्मणः। अथवा अल्पमेवास्य आध्यात्मिकं मनुष्येषु, देवेषु च आधिदैविकम्, अस्य ब्रह्मणो यद्रूपं तदिति सम्बन्धः।

**सूत्रवाक्यम्**

अथ नु-इति हेतुः मीमांसायाः।

**विवरणवाक्यम्**

यस्माद् दहरमेव सुविदितं ब्रह्मणो रूपम्, अन्यदेव तद्विदिताद् इत्युक्तत्वात्। सुवेदेति च मन्यसे। अतोऽल्पमेव वेत्थ त्वं ब्रह्मणो रूपं यस्मादथ नु तस्माद् मीमांस्यम् एव अद्यापि ते तव ब्रह्म।

विचार्यमेव यावद् विदिताविदित-प्रतिषेधागमार्थानुभव इत्यर्थः।

**सूत्रवाक्यम्**

मन्ये विदितम् इति शिष्यस्य मीमांसानन्तरोक्तिः प्रत्यय-त्रय-सङ्गतेः।

**विवरणवाक्यम्**

सम्यग्वस्तु-निश्चयाय विचालितः शिष्यः, आचार्येण मीमांस्यमेव त इति चोक्तः, एकान्ते समाहितो भूत्वा विचार्य, यथोक्तं सुपरिनिश्चितः सन् आह आगमाचार्यात्मानुभव-प्रत्यय-त्रयस्य एक-विषयत्वेन सङ्गत्यर्थम्। एवं हि सुपरिनिष्ठिता विद्या सफला स्याद्, न अनिश्चितेति न्यायः प्रदर्शितो भवति। मन्ये विदितम् इति परिनिष्ठित-निश्चित-विज्ञान-प्रतिज्ञा-हेतूक्तेः।। १ ।।

**आनन्दगिरिटीका**

यदि मन्यसे सुवेद इत्यनेन वाक्येन शिष्यबुद्धिविचालना क्रियते स्थूणा-निखनन-न्यायेन गृहीतस्य दाढर्यार्थम्। एतत्संग्रहवाक्यं विवृणोति - **विदिताविदिताभ्यामन्यत्** इत्यादिना। अल्पमेव ब्रह्मणो रूपं नूनं त्वं वेत्थ इति को मन्यते इत्याकांक्षायामाह - **मन्यते इत्याचार्यः** इति। **यदिति**। यादृशमस्य ब्रह्मणो रूपं त्वम् अमंस्थाः (मन् लुङ्) तादृशं देवेष्वपि यो मन्यते सोऽपि दहरमेव नूनं मन्यते इति योजना। अथ न्विति हेतुः मीमांसायाः इति संग्रहवाक्यं विवृणोति - **यस्मात्** इत्यादिना। प्रतिवचनस्यार्थं संगृहीतं विवृणोति - **सम्यग्** इत्यादिना। **विचार्य** इति। मया विदितं ब्रह्मेति किं प्रतिवचनं वदामि उत अविदितमिति वा। नाद्यः। आचार्यागमप्रत्ययविरोधात् वेदनविषयतया च घटवद् अब्रह्मत्वप्रसङ्गात्, वेदितृत्वेन मम विकारित्वापाताच्च (ब्रह्मत्वाच्च मे विकारानर्हत्वाच्च)। न द्वितीयः। गोपालादिभ्योऽविशेषप्रसङ्गात्। तूष्णीं अवस्थाने वा अप्रतिभाप्रसङ्गात् (अप्रतिभा जाड्यम्)। इति विचार्य एकैकपक्षदोषपरिजिहीर्षया विदितमविदितं च इति समुच्चितं वच्मि। अज्ञानसंशयाद्यभावाद् विदितं वेदनविषयत्वाभावात् च अविदितमिति सुपरिनिश्चितः सन् प्रतिवचनमाह इत्यर्थः। प्रत्ययत्रयस्य सङ्गतिः सङ्घटनम् एकस्मिन् विषये किमर्थमुच्यते। संवादाधीनं प्रामाण्यमिति तार्किकस्थितेः (इदं ज्ञानं प्रमा तद्वति तत्प्रकारकत्वात् सफलप्रवृत्तिजनकत्वाद् इत्येवं ज्ञानान्तरसंवादेन एव ज्ञानप्रामाण्यं गृह्यते इति तार्क्किकसिद्धान्तात्) निश्चयार्थम्। स्वतःप्रामाण्य-पक्षे तु आगमार्थे प्रत्ययान्तर-संवादस्तात्पर्यद्योतकः प्रतिबन्धनिरासेन उपचारेण निश्चयहेतुः इति सर्वस्य प्रतिवचनवाक्यस्य तात्पर्यमुक्त्वा मन्ये विदितमित्यादिना मन्ये विदितमित्येकदेशस्यार्थं संगृह्णाति। (१)

## २.२

कथमिति श्रृणु -

**नाहं मन्ये सुवेदेति। नो न वेदेति वेद च।**

**यो नस्तद्वेद तद्वेद। नो न वेदेति वेद च।। २.२ ।।**

**पदभाष्यम्**

न अहं मन्ये सुवेदेति। नैवाहं मन्ये सुवेद ब्रह्मेति। नैव तर्हि विदितं त्वया ब्रह्मेत्युक्ते आह - नो न वेदेति, वेद च। वेद च इति च-शब्दाद् न वेद च।

ननु विप्रतिषिद्धं नाहं मन्ये सुवेद इति, नो न वेद इति, वेद च इति। यदि न मन्यसे सुवेद इति, कथं मन्यसे वेद च इति। अथ मन्यसे वेद एव इति, कथं न मन्यसे सुवेद इति। एकं वस्तु येन ज्ञायते तेनैव तदेव वस्तु न सुविज्ञायते इति विप्रतिषिद्धं, संशय-विपर्ययौ वर्जयित्वा। न च ब्रह्म

संशयितत्वेन ज्ञेयं, विपरीतत्वेन वेति नियन्तुं शक्यम्। संशय-विपर्ययौ हि सर्वत्रानर्थकरत्वेन एव प्रसिद्धौ।

एवमाचार्येण विचाल्यमानोऽपि शिष्यो न विचचाल, "अन्यदेव तद्विदितादथो अविदितादधि" इत्याचार्योक्तागम-सम्प्रदाय-बलाद् उपपत्त्यनुभव-बलाच्च। जगर्ज च ब्रह्म-विद्यायां दृढ-निश्चयतां दर्शयन्नात्मनः। कथमित्युच्यते -

**शिष्यः**

यः यः कश्चिद् नः अस्माकं सब्रह्मचारिणां मध्ये तद् मदुक्तं वचनं तत्त्वतो वेद, स तद् ब्रह्म वेद।

किं पुनस्तद्वचनमित्यत आह - "नो न वेदेति, वेद च" इति। यदेव "अन्यदेव तद्विदितादथो अविदितादधि" इत्युक्तं तदेव वस्तु अनुमानानुभवाभ्यां संयोज्य निश्चितं वाक्यान्तरेण "नो न वेद इति वेद च" इत्यवोचत्। आचार्य-बुद्धि-संवादार्थं मन्द-बुद्धि-ग्रहण-व्यपोहार्थं च। तथा च

गर्जितमुपपन्नं भवति "यो नस्तद्वेद तद्वेद" इति।। २.२ ।।

**आनन्दगिरिटीका**

आचार्यवचनादन्यदेव वचनं शिष्य उवाच इति नाशङ्कनीयमित्याह - **यदेव अन्यदेव** इति। तथा च इति। आचार्यबुद्धिसंवादे सति अर्थान्तरानभिधाने सति इत्यर्थः।

**वाक्यभाष्यम्**

परिनिष्ठितं सफलं विज्ञानं प्रतिजानीते आचार्यात्म-निश्चययोः तुल्यतायै यस्माद् हेतुमाह नाह मन्ये सुवेद इति। अह-इत्यवधारणार्थो निपातो न एव मन्ये इत्येतत्। यावद् अपरिनिष्ठितं विज्ञानं तावद् सुवेद सुष्ठु वेद अहं ब्रह्म इति विपरीतो मम निश्चय आसीत्। स अपजगाम भवद्भिर्विचालितस्य, यथोक्तार्थ-मीमांसा-फल-भूतात् स्वात्म-ब्रह्मत्व-निश्चय-रूपात् सम्यक्प्रत्ययाद् विरुद्धत्वात्। अतो नाह मन्ये सुवेद इति।

यस्माच्च तन्नैव न वेद इति मन्ये इत्यनुवर्त्तते। अविदित-ब्रह्म-प्रतिषेधात्। कथं तर्हि मन्यसे इत्युक्त आह - वेद च। च-शब्दाद् वेद च, न वेद च इत्यभिप्रायः। विदिताविदिताभ्यामन्यत्वाद् ब्रह्मणः। तस्माद् मया विदितं ब्रह्म इति मन्ये इति वाक्यार्थः। अथवा वेद चेति नित्य-विज्ञान-ब्रह्म-स्वरूपतया नो न वेद, वेदैव चाहं स्वरूप-विक्रियाभावात्। विशेष-विज्ञानं च पराध्यस्तं न स्वतः, इति परमार्थतो न च वेदेति।

**सूत्रवाक्यम्**

यो नस्तद्वेद तद्वेद इति पक्षान्तर-निरासार्थमाम्नाय उक्तार्थानुवादात्।

**विवरणवाक्यम्**

यो नः अस्माकं मध्ये यथा अहं वेद इति स एव तद् ब्रह्म वेद नान्यः। उपास्य-ब्रह्म-वित्त्वाद् अतोऽन्यस्य। वेद च इति पक्षान्तरे ब्रह्म-वित्त्वं निरस्यते। कुतोऽयमर्थोऽवसीयते इत्युच्यते। उक्तानुवादात्। उक्तं ह्यनुवदति नो न वेद इति, वेद च इति।। २ ।।

**आनन्दगिरिटीका**

संगृहीतं (मन्ये विदितम् इति) स्फुटयति - **परिनिष्ठितम्** इत्यादिना। **विरुद्धत्वात्** इति। विपरीतप्रत्ययस्य सम्यग्ज्ञानविरुद्धत्वात् तदुदयमात्राद् विपरीतप्रत्ययोऽपगत इत्यर्थः। न केवलं विपरीतप्रत्ययस्य संशयस्य वा अभावाद् मम निश्चितं विज्ञानम् अज्ञानाभावाच्च (अज्ञाने ज्ञानाभावे संशयविपर्ययौ न स्तः। तदभावाच्च) इत्याह - **यस्माच्च** इति। अथवा वेद च इत्यस्य अन्योऽर्थः कथ्यते। यदि अनित्यमात्मविज्ञानं स्यात् तर्हि तस्य प्रागभावकाले प्रध्वंसाभावकाले वा अज्ञानं सम्भाव्येत (घटज्ञानवत्)। न तु तदस्ति। नित्यं हि विज्ञानं ब्रह्म मम स्वरूपं ततो नो न नेद। यदि च वेदनं मम विक्रिया भवेत् तदा विक्रियायाः कादाचित्कत्वात् कदाचिद् अहं वेद इति शङ्क्येत। न तु तदस्ति। स्वरूपविज्ञानस्य अन्यथात्वासम्भवात् सदा वेद एवाहम्। यथा स्वाभाविकाचलतया पर्वताः तिष्ठन्ति इति व्यपदेशः तद्वदित्यर्थः। स्वसत्तायां स्वयं प्रमा इति स्वप्रकाशत्वमादाय व्याख्यातं च-शब्दार्थमाह - विशेषविज्ञानं च इति। आगमात् विचारसहकृताद् ज्ञातं ब्रह्मात्मकताव्यञ्जकम् अन्तःकरण-परिणाम-रूपं ब्रह्मास्मीति विशेषविज्ञानं तत्परेण (तद्विज्ञानपरेण) अन्तःकरणेन उपाधिना आत्मन्यध्यस्तं न परमार्थतो (ब्रह्मास्मीति) ज्ञानवत्वम् आत्मनः इति न वेद च इति घटते इत्यर्थः। प्रकारान्तरेणापि (विदितत्वादिना रूपेण) ब्रह्मविज्ञानं सम्भवति इति शङ्कानिरासार्थं वाक्यैकदेशः इत्याह - **यो**

**नस्तद्वेद तद्वेद** इति। इदं सूत्रवाक्यं विवृणोति - **यो नः अस्माकम्** इति। यो नः अस्माकं मध्ये तद्विदिताविदितान्यत्वं वेद इति शेषः। यथा अहं वेद अतः अन्येन प्रकारेण विदुषः उपास्यब्रह्मवित्वादिति योजना। **उक्तानुवादात्** इति। अभ्यासाख्य-तात्पर्यलिङ्गदर्शनात् अविषयतया एव ब्रह्मविज्ञानं विवक्षितमित्यर्थः। (२)

## २.३

शिष्याचार्य-संवादात् प्रतिनिवृत्त्य स्वेन रूपेण श्रुतिः समस्त-संवाद-निर्वृत्तमर्थमेव बोधयति यस्यामतमित्यादिना -

**यस्यामतं तस्य मतं मतं यस्य न वेद सः।**

**अविज्ञातं विजानतां विज्ञातमविजानताम्।। २.३ ।।**

यस्य ब्रह्म-विदः अमतम् अविज्ञातम् अविदितं ब्रह्म इति मतम् अभिप्रायः निश्चयः तस्य मतं ज्ञातं सम्यग्ब्रह्म इत्यभिप्रायः। यस्य पुनः मतं ज्ञातं विदितं मया ब्रह्म इति निश्चयः न वेद एव सः। न ब्रह्म विजानाति सः।

विद्वदविदुषोर्यथोक्तौ पक्षौ अवधारयति - अविज्ञातं विजानतामिति। अविज्ञातम् अमतम्

अविदितमेव ब्रह्म विजानतां सम्यग् विदितवतामित्येतत्। विज्ञातं विदितं ब्रह्म अविजानताम् असम्यग्दर्शिनाम् इन्द्रिय-मनो-बुद्धिष्वेवात्म-दर्शिनामित्यर्थः। न त्वत्यन्तमेवाव्युत्पन्न-बुद्धीनाम्। न हि तेषां विज्ञातम् अस्माभिर्ब्रह्म इति मतिर्भवति। इन्द्रिय-मनो-बुद्ध्युपाधिष्वात्म-दर्शिनां तु ब्रह्मोपाधि-विवेकानुपलम्भात्, बुद्ध्याद्युपाधेश्च विज्ञातत्वाद्, विदितं ब्रह्म इत्युपपद्यते भ्रान्तिः इत्यतोऽसम्यग्दर्शनं पूर्वपक्षत्वेन उपन्यस्यते - विज्ञातमविजानतामिति। अथवा हेत्वर्थः उत्तरार्धोऽविज्ञातमित्यादिः।। २.३ ।।

**आनन्दगिरिटीका**

**अथवा हेत्वर्थः** इति। लोके शुक्त्यादितत्वं विजानतां यतः अध्यस्तं रूप्याद्यविज्ञातं भवति, अजानतामेव त्वध्यस्तं विज्ञातं भवति इति प्रसिद्धम्। तथा ब्रह्मणि ज्ञेयत्वस्य अध्यस्तत्वाद् एव तत्वविदो न ज्ञातं ब्रह्म पश्यन्ति इत्यर्थः (या निशा इत्युक्त्यनुसारम्। अविद्वान् अध्यस्तं ज्ञेयत्वविशिष्टं ब्रह्म पश्यति)। (३)

**वाक्यभाष्यम्**

**सूत्रवाक्यम्**

यस्यामतम् इति श्रौतम् आख्यायिकार्थोपसंहारार्थम्।

**विवरणवाक्यम्**

शिष्याचार्योक्ति-प्रत्युक्ति-लक्षणया अनुभव-युक्ति-प्रधानया आख्यायिकया योऽर्थः सिद्धः स श्रौतेन वचनेन आगम-प्रधानेन निगमन-स्थानीयेन संक्षेपत उच्यते।

यदुक्तं विदितादन्यद् वागादीनामगोचरत्वात्, मीमांसितं च अनुभवोपपत्तिभ्यां ब्रह्म तत् तथैव ज्ञातव्यम्। कस्मात् यस्यामतं यस्य विविदिषा-प्रयुक्त-प्रवृत्तस्य साधकस्य अमतमविज्ञातमविदितं ब्रह्म इत्यात्म-तत्त्व-विश्चय-फलावसानावबोधतया विविदिषा निवृत्ता इत्यभिप्रायः। तस्य मतं ज्ञातम्। तेन

विदितं ब्रह्म येनाविषयत्वेन आत्मत्वेन प्रतिबुद्धमित्यर्थः। स सम्यग्दर्शी यस्य विज्ञानानन्तरमेव ब्रह्मात्भावस्यावसितत्वात् सर्वतः कार्याभावः। विपर्ययेण मिथ्याज्ञानो भवति। कथम् मतं विदितं ज्ञातं मया ब्रह्म इति यस्य विज्ञानं स मिथ्या-दर्शी विपरीत-विज्ञानो विदितादन्यत्वाद् ब्रह्मणः। न वेद सः न विजानाति।

ततश्च सिद्धमवैदिकस्य विज्ञानस्य मिथ्यात्वम् अब्रह्म-विषयतया निन्दितत्वात्। तथा कपिल-कणभुगादि-समयस्यापि विदित-ब्रह्म-विषयत्वाद् अनवस्थित-तर्क-जन्यत्वाद् विविदिषाऽनिवृत्तेश्च मिथ्यात्वमिति। स्मृतेश्च या वेद-बाह्याः स्मृतयो याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रोक्ताः तमोनिष्ठा हि ताः स्मृताः (मनु. १२.९५) इति विपरीत-मिथ्या-ज्ञानयोः अनष्टत्वात्।

**सूत्रवाक्यम्**

अविज्ञातं विजानतां विज्ञातमविजानताम् इति पूर्व-हेतूक्तिः अनुवादस्यानर्थक्यात्।

**विवरणवाक्यम्**

अनुवादमात्रेऽनर्थकं वचनमिति पूर्वोक्तयोर्यस्यामतमित्यादिना ज्ञानाज्ञानयोः हेत्वर्थत्वेन इदमुच्यते। अविज्ञातम् अविदितमात्मत्वेन अविषयतया ब्रह्म विजानतां यस्मात् तस्मात् तदेव ज्ञानम्। यत्तेषां विज्ञातं विदितं व्यक्तमेव बुद्ध्यादि-विषयं ब्रह्म अविजानतां विदिताविदित-व्यावृत्तम् आत्मभूतं नित्य-विज्ञान-स्वरूपमात्मस्थमविक्रियममृतमजरम् अभयम् अनन्यत्वादविषयम् इत्येवम् अविजानताम्। बुद्ध्यादि-विषयात्मतयैव नित्यं विज्ञातं ब्रह्म। तस्माद्विदिताविदित-व्यक्ताव्यक्त-धर्माध्यारोपेण कार्य-कारण-भावेन सविकल्पम् अयथार्थ-विषयत्वात्। शुक्तिकादौ रजताद्यध्यारोपण-ज्ञानवद् मिथ्याज्ञानं तेषाम्।। ३ ।।

**आनन्दगिरिटीका**

यस्यामतमितिवाक्यार्थं संगृहीतं व्याख्याति - **शिष्याचार्येत्यादिना**। (ननु इदं चेत् श्रौतं पूर्वं तर्हि किं सर्वं पौराणिकम् नेत्याह - श्रौतमिति) श्रौतमिति (श्रुतौ भवम्) शिष्यस्य आचार्यस्य च उक्तिः न भवति इति ख्यापनार्थम्। तेन श्रौतेन वचनेन कथम् (किमर्थम्) उच्यते इत्याकांक्षायामाह - **यदुक्तम्** इति। यद्ब्रह्म विदितादन्यद् उक्तमिति संबन्धः। गोपालादीनाम् इव आत्मतत्वं न विवक्षितं किन्तु ब्रह्मणः आत्मत्व-निश्चय-फलावसानोऽवबोधः यस्य स तथोक्तः तस्य भावः तत्ता तया बुभुत्सा निवृत्ता। विचार्यमाणे ब्रह्मणः आत्मत्वेन पर्यवसानाद् (आत्मनः च वेदनैकरूपत्वात्) अतिरिक्त-मन्तव्याभावाद् (आत्मातिरिक्तस्य मन्तव्यस्य ब्रह्मणः अभावात्) अमतमित्यर्थः। अविज्ञातं विजानतां इति उत्तरार्धस्य संगृहीतं विवृणोति - **अनुवादमात्रे** इत्यादिना। **हेत्वर्थत्वेन** इति। अयमर्थः - पूर्वेषां (याज्ञवल्क्यादीनाम्) ब्रह्म विजानतां अविज्ञातत्वेन एव ब्रह्मणः प्रसिद्धत्वात् इदानीमपि अविषयतया ज्ञानं, तथा पूर्वेषामविदुषां (बौद्धादीनाम्) विज्ञातत्वेन एव ब्रह्मणः प्रसिद्धत्वाद् इदानीमपि विषयतया ज्ञानमसम्यग्ज्ञानमिति। बुद्ध्यादिविषयं तद्रूपतया बुद्धिरात्मा मन आत्मा इन्द्रियमात्मा इति विज्ञानं वेदबाह्यानां ब्रह्म बौद्धादीनां प्रसिद्धम्। तत इदानीमपि तन्मतानुसारिणां भ्रान्तानामेव बुद्ध्यादिविषयमनात्मरूपम् आत्मतया अभिमतमित्यर्थ। (३)

## २.४

अविज्ञातं विजानताम् इत्यवधृतम्। यदि ब्रह्म अत्यन्तमेवाविज्ञातं, लौकिकानां ब्रह्म-विदां चाविशेषः प्राप्तः। अविज्ञातं विजानताम् इति च परस्पर-विरुद्धम्। कथं तु तद्-ब्रह्म सम्यग्विदितं भवति इत्येवमर्थम् आह -

**प्रतिबोधविदितं मतम् अमृतत्वं हि विन्दते।**

**आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्।। २.४ ।।**

(यदा ब्रह्म) प्रतिबोधविदितं (बोधं बोधं प्रति विदितं) (तदा तत्) मतं (ज्ञातम्, सम्यगदर्शनम् भवति) हि (यस्माद् उक्तात्मब्रह्मज्ञानात्) अमृतत्वं विन्दते। आत्मना (समाहितेन चेतसा) वीर्यं (सामर्थ्यम्) विन्दते। विद्यया अमृतं विन्दते।

प्रतिबोधविदितं बोधं बोधं प्रति विदितम्। बोध-शब्देन बौद्धाः प्रत्ययाः उच्यन्ते। सर्वे प्रत्यया विषयी-भवन्ति यस्य स आत्मा सर्व-बोधान् प्रतिबुध्यते।

**प्रत्ययसाक्षितया ब्रह्मणोऽभेदप्रतिपादनम्**

सर्व-प्रत्यय-दर्शी चिच्छक्ति-स्वरूप-मात्रः प्रत्ययैरेव प्रत्ययेष्वविशिष्टतया लक्ष्यते। नान्यद् द्वारमात्मनो विज्ञानाय। अतः प्रत्यय-प्रत्यगात्मतया विदितं ब्रह्म यदा, तदा तद् मतं तत् सम्यग्दर्शनमित्यर्थः। सर्व-प्रत्यय-दर्शित्वे चोपजननापाय-वर्जित-दृक्-स्वरूपता, नित्यत्वं, विशुद्ध-स्वरूपत्वम्, आत्मत्वं, निर्विशेषता, एकत्वं च सर्व-भूतेषु, सिद्धं भवेत्। लक्षण-भेदाभावाद् व्योम्नः इव घट-गिरि-गुहादिषु। विदिताविदिताभ्यामन्यद् ब्रह्म इत्यागम-वाक्यार्थः एवं परिशुद्ध एवोपसंहृतो भवति। दृष्टेर्द्रष्टा, श्रुतेः श्रोता, मतेर्मन्ता विज्ञातेः विज्ञाता (बृ ३.४.२) इति हि श्रुत्यन्तरम्।

**बोधक्रियाकर्त्ता आत्मेत्यस्य एकदेशि-मतस्य दूषणम्**

यदा पुनः बोध-क्रिया-कर्त्तेति बोध-क्रिया-लक्षणेन तत्कर्त्तारं विजानाति इति बोध-लक्षणेन विदितं

प्रतिबोध-विदितमिति व्याख्यायते, यथा यो वृक्ष-शाखाश्चालयति स वायुरिति तद्वत्, तदा बोध-क्रिया-शक्तिमान् आत्मा द्रव्यं, न बोध-स्वरूप एव। बोधस्तु जायते, विनश्यति च। यदा बोधो जायते तदा बोध-क्रियया सविशेषः। यदा बोधो नश्यति तदा नष्ट-बोधो द्रव्य-मात्रं निर्विशेषः। तत्रैवं सति विक्रियात्मकः सावयवोऽनित्योऽशुद्ध इत्यादयो दोषा न परिहर्त्तुं शक्यन्ते।

**काणादमतखण्डनम्**

यदपि काणादानाम् आत्म-मनःसंयोगजो बोधः, आत्मनि समवैति। अत आत्मनि बोद्धृत्वम्, न तु विक्रियात्मकः आत्मा, द्रव्य-मात्रस्तु भवति, घट इव राग-समवायी। अस्मिन् पक्षेऽप्यचेतनं द्रव्य-मात्रं ब्रह्मेति "विज्ञानमानन्दं ब्रह्म" (बृ. ३.९.२८) "विज्ञानं ब्रह्म" (ए. ५.३) इत्याद्याः श्रुतयो बाधिताः स्युः। आत्मनो निरवयवत्वेन प्रदेशाभावाद् नित्य-संयुक्तत्वाच्च मनसः, स्मृत्युत्पत्ति-नियमानुपपत्तिरपरिहार्या स्यात्। संसर्ग-धर्मित्वं चात्मनः श्रुति-स्मृति-न्याय-विरुद्धं कल्पितं स्यात्।

"असङ्गो न हि सज्जते" (बृ. ३.९.२६), "असक्तं सर्वभृत्" (गी. १३.१४) इति हि श्रुति-स्मृती।

न्यायश्च गुणवद् गुणवता संसृज्यते, नातुल्य-जातीयम्। अतः निर्गुणं निर्विशेषं सर्व-विलक्षणं केनचिदप्यतुल्य-जातीयेन संसृज्यत इत्येतद् न्याय-विरुद्धं भवेत्। तस्मात् नित्यालुप्त-विज्ञान-स्वरूप-ज्योतिरात्मा ब्रह्म इत्ययमर्थः सर्व-बोध-बोद्धृत्वे आत्मनः सिध्यति, नान्यथा। तस्मात् प्रतिबोध-विदितं मतम् इति यथा-व्याख्यात एवार्थोऽस्माभिः।

**एकदेशिव्याख्यानान्तरदूषणम्**

यत्पुनः स्व-संवेद्यता प्रतिबोध-विदितम् इत्यस्य वाक्यस्यार्थो वर्ण्यते, तत्र भवति सोपाधिकत्वे आत्मनः बुद्ध्युपाधि-स्वरूपत्वेन भेदं परिकल्प्य, आत्मना आत्मानं वेत्ति इति संव्यवहारः। "आत्मन्येवात्मानं पश्यति" (बृ. ४.४.२३), "स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम" (गी.

१०.१५) इति। न तु निरुपाधिकस्य आत्मनः एकत्वे स्व-संवेद्यता पर-संवेद्यता वा सम्भवति। संवेदन-स्वरूपत्वात् संवेदनान्तरापेक्षा च न सम्भवति। यथा प्रकाशस्य प्रकाशान्तरापेक्षायाः न सम्भवः, तद्वत्।

**बौद्धपक्षस्य खण्डनम्**

बौद्ध-पक्षे स्व-संवेद्यतायां तु क्षण-भङ्गुरत्वं, निरात्मकत्वं च विज्ञानस्य स्यात्। "न हि विज्ञातुर्विज्ञातेः विपरिलोपो विद्यतेऽविनाशित्वात्" (बृ. ४.३.३०), "नित्यं विभुं सर्वगतम्" (मु. १.१.६), स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयः (बृ. ४.४.२५) इत्याद्याः श्रुतयो बाध्येरन्।

**अन्यमतानां खण्डनम्**

यत्पुनः प्रतिबोध-शब्देन निर्निमित्तो बोधः प्रतिबोधः, यथा सुप्तस्य इत्यर्थं परिकल्पयन्ति, सकृद्विज्ञानं प्रतिबोधः इत्यपरे, निर्निमित्तः सनिमित्तः सकृद्वा असकृद्वा प्रतिबोधः एव हि सः।

अमृतत्वम् अमरण-भावं, स्वात्मन्यवस्थानं, मोक्षं हि यस्माद् विन्दते लभते यथोक्तात् प्रतिबोधात्, प्रतिबोध-विदितात्मकात्, तस्माद् प्रतिबोध-विदितमेव मतमित्यभिप्रायः। बोधस्य हि प्रत्यगात्म-विषयं च मतममृतत्वे हेतुः। न ह्यात्मनोऽनात्मत्वम् अमृतत्वं भवति। आत्मत्वादात्मनोऽमृतत्वं निर्निमित्तमेव। एवं मर्त्यत्वमात्मनो यदविद्यया अनात्मत्व-प्रतिपत्तिः।

**ज्ञानेन अमृतत्वप्राप्तिप्रकारः**

कथं पुनर्यथोक्तया आत्म-विद्यया अमृतत्वं विन्दते इत्यत आह - आत्मना स्वेन रूपेण विन्दते लभते वीर्यं बलं, सामर्थ्यम्। धन-सहाय-मन्त्रौषधि-तपो-योग-कृतं वीर्यं मृत्युं न शक्नोत्यभिभवितुम्, अनित्य-वस्तु-कृतत्वात्। आत्म-विद्या-कृतं तु वीर्यमात्मनैव विन्दते, नान्येन इत्यतः अनन्य-

साधनत्वाद् आत्म-विद्या-वीर्यस्य, तदेव वीर्यं मृत्युं शक्नोत्यभि-भवितुम्। यत एवमात्म-विद्या-कृतं वीर्यमात्मनैव विन्दते अतः विद्यया आत्म-विषयया विन्दते अमृतम् अमृतत्वम्। "नायमात्मा बलहीनेन लभ्यः" (मु ३.२.४) इत्याथर्वणे। अतः समर्थो हेतुः अमृतत्वं हि विन्दते इति।। २.४ ।।

**आनन्दगिरिटीका**

ज्ञातब्रह्मत्वादर्शने (ब्रह्मणो ज्ञातत्वानवबोधे) ब्रह्मास्मीति कथं व्यवहरति (ज्ञातस्यैव व्यवहारविषयत्वादिति भावः। ब्रह्म ज्ञातं भवितुमर्हति व्यवहाराङ्गत्वाद् घटवत्।) इति चेत् किमनया इष्टका-वाहकानां रत्नपेटक-चिन्तया। ज्ञातस्य व्यवहाराङ्गत्वं वदतोऽपि वस्तुप्रकाशस्य (स च स्वतः परतो वा इत्यनियमः) व्यवहाराङ्गत्वस्य इष्टत्वात् (प्रकाशमन्तरेण ज्ञातत्वानिर्वाहादिति भावः। प्रकाशेनैव च व्यवहारसिद्धौ वास्तवज्ञाततापेक्षायां कारणाभावादिति भावः) वास्तव-ज्ञातताऩपेक्षत्वाद् इत्यव्युत्पन्न-व्युत्पादनाय चोद्यमुद्भावयति - **अविज्ञातम्** इत्यादिना। नील-पीताद्याकाराणां बुद्धिविकाराणां जडानां यच्चैतन्य-व्याप्तत्वेन अजडवद् अवभासः तं साक्षिणं उपलभ्य सोऽहमात्मा ब्रह्म इति महावाक्याद् अविषयतया एव यो वेत्ति स ब्रह्मविदुच्यते। तेन नाविशेष-प्रसङ्गादिचोद्यावकाशः इत्याह - **प्रतिबोधविदितम्** इति। (सर्व)प्रत्ययेषु अविशिष्टतया अनुगतरूपेण इत्यर्थः। येन चित्स्वरूपेण अहमत्र साक्षी तस्य सर्वत्र अविशेषाद् नैकस्मिन् एव देहेऽहं साक्षी वेदोत्पत्यादीनां च साक्ष्य-गतत्वेन साक्षिणि एकत्व-नित्यत्वादिकमपि सिध्यति इत्याह - **सर्वप्रत्ययदर्शित्वे च** इति। विदितत्वाविदितत्वयोः साक्ष्यगतत्वेन तदन्यत्वमपि अस्मिन् पक्षे सम्भवति इत्याह - **विदिताविदिताभ्यामन्यत्** इति।

एकदेशिव्याख्यानमुद्भाव्य दूषयति - **यदा पुनः** इत्यादिना। अग्निसंयोगाद् घटलौहित्यवद् मनःसंयोगाद् असमवायिकारणाद् आत्मन्यचेतने चैतन्यमुत्पद्यते इत्येतन्न केवलं श्रुतिविरुद्धम् असम्भावितं चेत्याह - **आत्मनो निरवयवत्वेन** इति। प्रदेशवता प्रदेशवतो लोके संयोगः दृष्टः। आत्मनो निष्प्रदेशत्वाद् मनसा संयोगो न सम्भवति इत्युक्तं तदयुक्तम्। युगपत् सर्वमूर्त्तसंयोगित्वं सर्वगतत्वम् आत्मनः, ततो मनसः संयोगोऽपि इति चेत् तत्राह - **नित्येति**। ग्रहण(अनुभव)कालादन्यकाल एव स्मृतीनां क्रमेण एव उत्पत्तिरिति नियमः वैशेषिकस्य नोपपद्यते ग्रहणकालेऽपि स्मृत्युत्पत्ति-प्रसङ्गाच्च संस्कारवदात्ममनःसंयोगस्य अविशेषादित्यर्थः। सर्वगतत्वं (अधिष्ठानतया सर्वतादात्म्यम् इत्यर्थः।) च सर्वाव्यवधानमात्रं न तु संयोगित्वं कल्पनीयमित्याह - **संसर्गधर्मित्वं च** इति। न्यायविरुद्धमित्युक्तं तत्स्फुटयति - **न्यायश्च** इति। एकदेशिव्याख्यानान्तरमनूद्य दूषयति - **यत्पुनः** इत्यादिना। यद्वेद्यं तद्वेदितुः वेदनाच्च भिन्नं यथा घटादि इति व्याप्तिविरोधात् स्वसंवेद्यत्वं वास्तवं नोपपद्यते ततो बुद्ध्यादौ आत्मभावमारोप्य आत्मना तस्य वेद्यत्वं वाच्यमिति, निरुपाधिकस्वरूपस्थितिः न स्यात् इत्याह - तत्र भवति सोपाधिकत्वम् इति। काणादस्य स्वसंवेद्यत्वानङ्गीकारबलात् परवेद्यत्वं प्रसज्यते इत्यपि न वाच्यमित्याह -

**संवेदनस्वरूपत्वात्** इति। बौद्धेन स्वसंवेद्यं विज्ञानमिष्टं तव किं न स्यात् इत्यत आह - बौद्धपक्षे इति। प्रत्यक्षस्य वर्तमानावभासकत्वात् क्षणान्तरविशिष्टे स्वात्मनि क्षणान्तरविशिष्टं तदेव विज्ञानं प्रत्यक्षं न सम्भवति (उत्तरक्षणविशिष्टविज्ञानं प्रति पूर्वक्षणविशिष्टस्य भूतत्वात् पूर्वं प्रति च उत्तरस्य भावित्वादिति भावः)। अतः स्वात्मनि स्वयमेव विज्ञानं प्रत्यक्षं चेत् वर्तमानक्षणमात्रं सत्वं स्यात् (सत्त्वस्य प्रमाणाधीनत्वात् प्रमाणेन च वर्तमानक्षणमात्रं विषयीकरणादिति भावः)। स्वसंवेद्यत्वेन साक्षिणः अनङ्गीकाराद् निरात्मत्वं च स्यादेव तत् श्रुतिविरुद्धमित्यर्थः (यथा देहस्य साक्षिणैव सात्मत्वं तथा विज्ञानस्य साक्षिणैव सात्मत्वं सम्भवति असाक्षिकत्वे तु निरात्मत्वमेव स्यादिति भावः)।

प्रतिबोधवाक्यस्य अर्थान्तरं शङ्कते - **यत्पुनः** इति। ब्रह्माहमस्मीति चिन्तयतो यावत् चेतोव्यापृतिः तावत् संप्रज्ञातसमाधिः निवृत्ते चेतोव्यापारे यः परमानन्दसाक्षात्कारः सौषुप्तानन्दसाक्षात्कारवत् सः असंप्रज्ञातसमाधिः प्रतिबोध उच्यते। तदुक्तं वार्त्तिककृता अपरायत्तबोधो हि निदिध्यासनमुच्यते इति। अथवा अक्रिय-ब्रह्मात्मत्वानुभवे सति प्रमातृत्वानुपपत्तौ पुनः ज्ञानासम्भवात् सद्योमुक्तिकारणं सकृद्विज्ञानं प्रतिबोध उच्यते। सकृत्प्रवृत्त्या मृद्नाति क्रियाकारकरूपभृत्। अज्ञानमागमज्ञानं सांगत्यं नास्त्यतोऽनयोः।। इति। पक्षद्वयेऽपि अरुचिमाह - **निर्निमित्त** इति। अयमाशयः - न तावद् अविद्यानिवर्तकस्य आगन्तुकस्य बोधस्य निर्निमित्तत्वं सम्भवति। कार्यस्य सनिमित्तत्वव्याप्तेः। सौषुप्तस्यापि न निर्निमित्तत्वमविद्यायाः पूर्वपूर्व-निरोधावस्था-संस्कारोद्भूत-तादृशवृत्त्यभिव्यक्त-चैतन्यस्य तत्र सुखसाक्षात्कारत्वोपगमात्। अत एव (अविद्यावृत्तिनिमित्तकत्वात्) वृत्तिविशिष्टस्य विनाशे (स्मृतिहेतुसंस्कारस्य अनुभवनाशाधीनत्वात्) स्मरणमुपपद्यते (न च एतत् सौषुप्तबोधस्य निर्निमित्तचिन्मात्रत्वोपगमे घटते। स्मृत्यर्थं अविद्यावृत्तेरपि अङ्गीकर्त्तव्यम्)। अत्रापि (असंप्रज्ञातसमाधौ) तर्हि आवृत्तिसंस्कारप्रचयाद् (संप्रज्ञातसमाधिसंस्कारातिशयात्) निवृत्तेऽपि चित्ते ब्रह्माभिव्यक्तं स्यादिति चेत्। न। तथा सति (प्रमाणोत्थवृत्तिं विना एव ब्रह्माभिव्यक्त्यभ्युपगमे सति) अप्रमात्वेन (संस्कारप्रचयजन्यायाः ब्रह्माभिव्यक्तेः) विनष्टपुत्रापरोक्षादिव (तस्याः इति शेषः) अविद्यानिवृत्तिः न स्यात्। (समाधिजन्यज्ञानस्य) शाब्दज्ञानसंवादात् प्रमात्वे परतन्त्रत्वप्रसङ्गः (मीमांसकमतविरुद्धत्वम्)। शब्दमूलत्वात् (शब्दमूलावृत्तिरेव संस्कारमात्रावशेषा ब्रह्माकारा अभ्युपेया इति शब्दजत्वेन) प्रमात्वे न निर्निमित्तता इति। प्रवृत्तफलकर्म(प्रारब्धकर्म)प्रतिबन्धाद् वर्तमान-प्रमातृत्वाभासानिवृत्तेः असकृद् बोधोऽपि सम्भवति इति पक्षद्वयेऽपि नाऽऽदरः। सर्वथाऽपि परमात्मा प्रतिबोधः एव बोधं प्रति बोधं प्रति साक्षितया भातीति।

लक्ष्यपदार्थविवेचनपूर्वकं महावाक्योत्थं परमात्मा अस्मि इति ज्ञानमेव सम्यग्ज्ञानं यस्मात् ततः एव अमृतत्वं लभते इत्याह - **अमृतत्वम्** इति। उक्तमर्थं संक्षिप्याह - **बोधस्य हि** इति। बुद्धिपरिणामस्य सर्वस्य भासकं प्रत्यक्चैतन्यं परमात्मा न भवति किन्तु ब्रह्माण्डाद् बहिः स्थितः, तत्प्राप्तिश्च मोक्षः इत्याशङ्क्याह - न हि इति। अनात्मप्राप्तेः कर्मफलवद् अनित्यत्वेन अमृतत्वप्रसिद्धिः न स्यादित्यर्थः। यदुक्तदोषपरिहाराय औपाधिक-भेदेन भिन्नत्वं ब्रह्मणः स्वतः तु आत्मत्वमेव इति मन्यसे तत्राह - **आत्मत्वात्** इति। ब्रह्मणः आत्मत्वादेव आत्मनोऽमृतत्वं स्वभावत एव सिद्धम्। तर्हि विद्यायाः आनर्थक्यं प्राप्तमित्याशङ्क्याह - **एवम्** इति। अविद्यया देहाद्यात्मत्व-प्रतिपत्तिः इति यत् तदात्मनः मर्त्यत्वं तन्निवृत्तिः विद्याफलमित्यर्थः। वीर्यं विद्याकृतमुक्तं मुक्तत्वे दार्ढ्यं तच्च स्वाभाविकमेव मुक्तत्वं वास्तवं सर्वशरीराद्यसंसर्गित्वाद् नभोवद् निरवयवत्वादेव। ततश्च नित्यमुक्तः एवाहमित्यवष्टम्भः विद्याकृतं बलमित्यर्थः। (४)

**वाक्यभाष्यम्**

**सूत्रवाक्यम्**

प्रतिबोध-विदितं मतम् इति वीप्सा प्रत्ययानाम् आत्मावबोध-द्वारत्वात्।

**विवरणवाक्यम्**

बोधं प्रति, बोधं प्रति इति वीप्सा सर्व-प्रत्यय-व्याप्त्यर्था। बौद्धाः हि सर्वे प्रत्ययाः तप्त-लोहवद् नित्य-विज्ञान-स्वरूपात्म-व्याप्तत्वाद् विज्ञान-स्वरूपावभासाः, तदन्यावभासश्चात्मा तद्विलक्षणः अग्निवद् उपलभ्यते इति तेन ते द्वारीभवन्ति आत्मोपलब्धौ। तस्मात् प्रतिबोधावभास-प्रत्यगात्मतया यद्विदितं तद् ब्रह्म, तदेव मतं ज्ञातं तदेव सम्यग्ज्ञानं यत् प्रत्यगात्म-विज्ञानं, न विषय-विज्ञानम्। आत्मत्वेन

प्रत्यगात्मानमैक्षत् (क. २.१.१) इति च काठके।

**आत्मज्ञानममृतत्वनिमित्तम्**

**सूत्रवाक्यम्**

अमृतत्वं हि विन्दते इति हेतु-वचनम्, विपर्यये मृत्यु-प्राप्तेः।

**विवरणवाक्यम्**

विषयात्म-विज्ञाने हि मृत्युः प्रारभत इति आत्म-विज्ञानममृतत्व-निमित्तमिति युक्तं हेतु-वचनम् अमृतत्वं हि विन्दते इति।

**अमृतत्वस्य अनुत्पादकत्वम्**

आत्म-ज्ञानेन किममृतत्वमुत्पाद्यते न। कथं तर्हि आत्मना विन्दते स्वेनैव नित्यात्म-स्वभावेन अमृतत्वं विन्दते। नालम्बन-पूर्वकम्। विन्दत इति आत्म-विज्ञानापेक्षम्। यदि हि विद्योत्पाद्यम् अमृतत्वं स्याद्, अनित्यं भवेत् कर्म-कार्यवत्। अतो न विद्योत्पाद्यम्।

**विद्यायाः अमृतत्वनिमित्तम्**

यदि च आत्मनैवामृतत्वं विन्दते किं पुनर्विद्यया क्रियत इत्युच्यते। अनात्म-विज्ञानं निवर्तयन्ती सा तन्निवृत्त्या स्वाभाविकस्यामृतत्वस्य निमित्तमिति कल्प्यते। यत आह वीर्यं विद्यया विन्दते। वीर्यं सामर्थ्यं अनात्माध्यारोप-माया-स्वान्त-ध्वान्तानभिभाव्य-लक्षणं बलं विद्यया विन्दते। तच्च किं-विशिष्टम् अमृतम् अविनाशी। अविद्याजं हि वीर्यं विनाशि। विद्ययाऽविद्याया बाध्यत्वात्। न तु विद्याया बाधकोऽस्तीति। विद्याजममृतं वीर्यम्। अतो विद्या अमृतत्वे निमित्त-मात्रं भवति। नायमात्मा बलहीनेन लभ्यः (मु. ३.२.४) इत्याथर्वणे। लोकेऽपि विद्याजमेव बलमभिभवति, न शरीरादि-सामर्थ्यं यथा हस्त्यादेः।

अथवा प्रतिबेध-विदितं मतमिति सकृदेवाशेष-विपीरत-निरस्त-संस्कारेण स्वप्न-प्रतिबोधवद् यद्विदितं तदेव मतं ज्ञातं भवतीति। अथवा गुरूपदेशः प्रतिबोधः, तेन वा विदितं मतमिति। उभयत्र प्रतिबोध-शब्द-प्रयोगोऽस्ति, सुप्त-प्रतिबुद्धो गुरुणा प्रतिबोधित इति। पूर्वं तु यथार्थम्।। ४ ।।

**आनन्दगिरिटीका**

केन द्वारेण तर्हि अविषयतया आत्मा अवगम्यताम् इत्याकांक्षायामाह - **प्रतिबोधेति**। संग्रहवाक्यं विवृणोति - **बोधं प्रति** इत्यादिना। यथा अस्मिन् शरीरे बुद्धिपरिणामाः जडाः अपि चिद्व्याप्ततया संवेदनवद् अवभासन्ते इति सम्भाव्यते। जडानां स्वाभाविक-प्रकाशानुपपत्तेः। तथा सर्वशरीरेषु बौद्धाः प्रत्ययाः यद्व्याप्ततया संवेदनवद् भासन्ते सोऽस्तीति सम्भाव्यते। एतदुक्तं भवति - श्रोतृशरीरावच्छिन्न-बौद्धप्रत्यय-साक्ष्येकस्त्वमर्थः। तदितर-सर्व-शरीरावच्छिन्न-बौद्धप्रत्यय-साक्ष्येकस्तदर्थः। चिन्मात्रे व्यावर्तकधर्मानुपलम्भाद् विभक्तत्वे च अनात्मत्वादि-दोषप्रसङ्गात् सम्भावितमेकत्वं तदेव ब्रह्म त्वमिति-वाक्यज-बुद्धि-वृत्तौ अविषयतया प्रकाशते ब्रह्मास्मीति। यस्मात् तान् अन्यान् जडान् अवभासयति इति तदन्यावभासः आत्मा सर्वजडविलक्षणः अवगन्तुं शक्यते तस्माद् इत्युपसंहारः। प्रतिबोधमवभासाः चित्प्रतिबिम्बाः तेषां प्रत्यगात्मा तया अव्यभिचरितस्वरूपेण बिम्बस्थानीयेन एकेन रूपेण यद्ब्रह्मवेदनं तत्सम्यग्दर्शनमित्यर्थः। विषयज्ञानं सम्यग्ज्ञानं न भवति इत्यत्र हेतुमाह - **आत्मत्वेन** इति। ब्रह्मणः आत्मत्वेन विषयत्वासम्भवाद् इत्यर्थः। अद्वयानन्दरूपस्य सर्वज्ञत्वादि-धर्मकस्य ब्रह्मणः शास्त्रैकसमधिगम्यत्वात् तटस्थस्य अपरोक्षत्वं न सम्भवति किन्तु प्रत्यग्रूपेणैव इत्यभिप्रेत्य काठकेऽपि विशेषणम् (प्रत्यक्त्वोक्तिः) इत्यर्थः। प्रत्यक्तया (एव) अपोरक्षं ब्रह्मज्ञानं तदेव सम्यग्ज्ञानम् इत्यत्र को हेतुः इत्याशङ्क्य अपरोक्षबन्धाध्यासस्य परोक्षज्ञानाद् विनृत्त्यसम्भवाद् अपरोक्षज्ञानस्य च तन्निवर्तनेन अमृतत्वसाधनत्वाद् इत्युत्तरवाक्यार्थं संगृह्णाति - **अमृतत्वं हि** इति। सूत्रं विभजते - **विषयात्मेति**। विषयेषु बुद्ध्यादिषु आत्मविज्ञाने

विषयतया वा व्यतिरिक्तस्य उपास्यतया ज्ञाने मृत्युः प्रारभते भयमिति प्रसिद्धम्। बुद्ध्यादिसङ्घातमात्मानं मन्यमानस्य उपासकस्य च कर्तृत्वभ्रमानिवृत्तेः। अथ येऽन्यथाऽतो विदुः अन्यराजानस्ते क्षय्यलोकाः भवन्ति इत्यादिश्रुतिभ्यश्च। तरति शोकमात्मवित् इत्याादिश्रुतिषु च आत्मज्ञानम् अमृतत्व-निमित्तं प्रसिद्धमित्यर्थः। **नालम्बनपूर्वकम्** इति। किञ्चिदुपास्यमालम्बनीकृत्य तदुपासनसाध्यतया न विन्दते (अमृतत्वम्) इत्यर्थः। कथं तर्हि विन्दते इति प्रयोगः इत्याकांक्षायामाह - **आत्मविज्ञानापेक्षम्** इति। आत्मविज्ञानेन मर्त्यत्वभ्रमनिवृत्तिम् अपेक्ष्य अमृतत्वमुपचर्यते इत्यर्थः। मुख्यार्थे बाधमाह - यदि हि इत्यादिना। अनात्मा विज्ञायते येन तदनात्मविज्ञानम् अनाद्यनिर्वाच्यम् आत्माज्ञानमित्यर्थः। पुनः अज्ञानान्तरोदयेन बन्धशङ्कायां कथं सकृदज्ञाननिवृत्तिमात्रेण अमृतत्वनिमित्तत्वं ज्ञानस्य इत्याशङ्क्य आह - **यत आह** इति। स्वस्य अन्तः अवच्छेदः भवति येन ध्वान्तेन तत्स्वान्तध्वान्तम् अनात्माध्यारोपः मनुष्यत्वाद्यभिमानः पारमेश्वरी शक्तिः माया जीवत्वनिमित्तमज्ञानं (जीवत्वोपाधिरविद्या मलिनसत्वप्रधानं प्रकृतेरेव रूपान्तरम्) स्वान्तध्वान्तम्। एतैः सर्वैः अभिभवनीयो न भवति आत्मा येन विद्याकृतेन अतिशयेन तद्वीर्यं विद्वान् लभते। पूर्वसिद्धस्य अज्ञानादेः नाशाद् मायायाश्च स्वतो जीवबन्धकत्वाभावाद् अभिनवस्य अज्ञानस्य उत्पत्तौ कारणाभावात्। प्रवृत्तफलकर्माक्षिप्तस्य च अज्ञानलेशस्य द्वैतावभासस्य च विद्वदनभिभावकत्वाद् दुर्बलत्वाद् निश्चीयते सम्यग्ज्ञानस्य अमृतत्वहेतुत्वम् इत्यर्थः। ननु विद्याजं चेत् कथमविनाशि कृतकस्य विनाशित्वनियमाद् इत्याशङ्क्य आह - **न तु विद्यायाः** इति। यावद्देहपातं जायमानः द्वैतावभासः विद्यया बाध्यते एव न मामभिभवितुं शक्नोति इत्यवष्टम्भः वीर्यं, तस्य अविनाशः अमृतत्वं तत्कारणविद्यायाः अबाध्यत्वाभिप्रायेण उच्यते न स्वरूपनाशाभावाभिप्रायेण इत्यर्थः। प्रतिबोधपदस्य यौगिकमर्थं व्याख्याय रूढ्यभिप्रायेण व्याचष्टे - **अथवा** इति। अशेषतया विपरीतः निरस्तः संस्कारः येन बोधेन स प्रतिबोधः युगपत् कृत्स्नाविद्यातत्कार्यनिवर्तकः सद्योमुक्तिहेतुः इत्यर्थः। प्रतिबोधशब्दस्त्रेधा व्याख्याय तत्र आद्यं व्याख्यानं युक्तमित्याह - **पूर्वं तु** इति। गुरूपदेशे सत्यपि प्रतिबोधं व्यापकात्मानुसन्धानं विना (प्रतिबोधं व्यापकः य आत्मा यद्व्याप्ताः सर्वे बौद्धप्रत्ययाः तदनुसन्धानं विना) उपरोक्षावगमासम्भवात् सद्योमुक्तेः च अशास्त्रीयत्वादित्यर्तः। (४)

**२.५**

कष्टा खलु सुर-नर-तिर्यक्-प्रेतादिषु संसार-दुःख-बहुलेषु प्राणि-निकायेषु जन्म-जरा-मरण-रोगादि-सम्प्राप्तिरज्ञानात्। अतः -

**इह चेदवेदीद् अथ सत्यमस्ति। न चेदिहावेदीद् महती विनष्टिः।**

**भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ।। २.५ ।।**

इह एव चेद् मनुष्योऽधिकृतः समर्थः सन् यदि अवेदीद् आत्मानं यथोक्त-लक्षणं विदितवान् यथोक्तेन प्रकारेण, अथ तदा अस्ति सत्यं मनुष्य-जन्मन्यस्मिन् अविनाशोऽर्थवत्ता वा, सद्भावो वा, परमार्थता वा, सत्यं विद्यते। न चेदिहावेदीदिति। न चेद् इह जीवन् चेदधिकृतः अवेदीद् न विदितवान्, तदा महती दीर्घा अनन्ता विनष्टिः विनाशनं जन्म-जरा-मरणादि-प्रबन्धाविच्छेद-लक्षणा संसार-गतिः।

तस्माद् एवं गुण-दोषौ विजानन्तो ब्राह्मणाः भूतेषु भूतेषु सर्व-भूतेषु, स्थावरेषु चरेषु च, एकमात्म-तत्त्वं ब्रह्म विचित्य विज्ञाय साक्षात्कृत्य धीराः धीमन्तः प्रेत्य व्यावृत्य ममाहंभाव-लक्षणाद् अविद्या-रूपाद् अस्माल्लोकाद् उपरम्य, सर्वात्मैक-भावमद्वैतमापन्नाः सन्तः अमृता भवन्ति ब्रह्मैव भवन्तीत्यर्थः। स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवति (मु. ३.२.९) इति श्रुतेः।। २.५ ।।

**आनन्दगिरिटीका**

उत्तरवाक्यस्य अपेक्षितमर्थमाह - **कष्टा खलु** इति। लौकिकमपि सत्यं चिरं जीवनं धनवत्वम्। सद्भावः साधुभावः ख्यातिः। एतदपि सर्वं ब्रह्मविदो भवति इति स्तुत्यर्थमुच्यते। परमार्थतः ब्रह्मरूपस्थितिस्तु फलमवश्यं भवति इत्यर्थः। (५)

**वाक्यभाष्यम्**

**सूत्रवाक्यम्**

इह चेदवेदीद् इत्यवश्यकर्त्तव्यतोक्तिर्विपर्यये विनाश-श्रुतेः।

**विवरणवाक्यम्**

इह मनुष्य-जन्मनि सति अवश्यमात्मा वेदितव्य इत्येतद्विधीयते। कथम् इह चेदवेदीद् विदितवान् अथ सत्यं परमार्थ-तत्त्वमस्त्यवाप्तम्। तस्य जन्म सफलमित्यभिप्रायः। न चेदिहावेदीद् न विदितवान् वृथैव जन्म। अपि च महती विनष्टिः महान् विनाशो जन्म-मरण-प्रबन्धाविच्छेद-प्राप्ति-लक्षणः स्यात्, यतस्तस्माद् अवश्यं तद्विच्छेदाय ज्ञेय आत्मा।

ज्ञानेन तु किं स्यात् इत्युच्यते - भूतेषु भूतेषु चराचरेषु सर्वेषु इत्यर्थः। विचित्य पृथङ् निष्कृष्य एकमात्म-तत्त्वं संसार-धर्मैः अस्पृष्टम् आत्म-भावेन उपलभ्य इत्यर्थः। अनेकार्थत्वाद् धातूनां न पुनः चित्वेति सम्भवति विरोधात्। धीराः धीमन्तो विवेकिनो विनिवृत्त-बाह्य-विषयाभिलाषाः प्रेत्य मृत्वा अस्माल्लोकात् शरीराद्यनात्म-लक्षणाद् व्यावृत्त-ममत्वाहंकाराः सन्त इत्यर्थः। अमृताः अमरण-धर्माणो नित्य-विज्ञानामृतत्व-स्वभावा एव भवन्ति।। ५ ।।

**आनन्दगिरिटीका**

इह चेद् अवेदीत् इत्यादिवाक्यार्थं संगृहीतं विवृणोति - **इह मनुष्यजन्मनि** इत्यादिना। **विरोधात्** इति। एकस्मिन् निरंशे चिन्मात्रे चयनस्य ऊर्ध्वाधोदेश-निवेशनस्य इष्टकानाम् इव असम्भवादित्यर्थः। (५)